Digitized by Arya Samaj Foundation Chennai and eGangotri

०७९८३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

079833

079833

67

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXII. No. 1. | १८७१-शकीये वैशाखे ३२श-वर्षस्य १म-संख्या | May. 1949.

67

श्रौतसूक्तिः

सं पूषन विदुषा नय
यो अञ्जसानु शासति ।
य एवेदमिति ब्रवत् ॥

तदनुवर्त्तिनी

लौकिकसूक्तिः

पूषन्ननुप्रापय तं सुविज्ञं
यः शास्ति नष्टाधिगमस्य मार्गम् ।
इदं विनष्टं द्रविणं त्वदीयम्
इत्थञ्च यो दर्शयति स्ववाचा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मासवार्त्तिकम्

यस्मिन् मासि तिथिः सतां बहुमता पुण्या तृतीयाक्षया
तस्यां लब्धजनुः पुरा कृतयुगं पुण्यक्रियाभास्वरम् ।
अस्यां चन्दनकोत्सवो भगवतः कृष्णस्य वृष्णिश्रियो
गङ्गावाप महीतलं समजनि श्रीजामदग्न्यस्तथा ॥
अस्मिन् मासि तिथिः प्रकामसुभगा या पञ्चमी पावनी
तस्यामार्यपथावनार्थमवनौ श्रीशङ्करोऽवातरत् ।
श्रीकृष्णस्य च पुष्पदोलनमहः श्रीपौर्णमास्यान्तिथौ
बुद्धस्यापि नवीनयोगविधये पुण्यावतारोऽभवत् ॥
अस्मिन्नेव चतुर्दशी शुभतिथिर्या शुक्लपक्षाश्रिता
तस्यामेव हिरण्यपूर्वकशिपोर्दुर्वृत्तदैत्याधमात् ।
प्रह्लादं निजभक्तराजमनघं बालं प्रियं रक्षितुं
प्रादुर्भावमगान्नृसिंहवपुषा स्तम्भादकस्माद्धरिः ॥

मतिमञ्जरी

समाप्तः पञ्चपञ्चाशदधिकत्रयोदशशततमो वङ्गीयाब्दः, प्रवर्त्तते चायं षट्पञ्चाशदधिकत्रयोदशशततमो नाम । अत्र किल वर्षारम्भे 'प्राप्ते नूतनवत्सरे प्रतिगृहं कुर्याद् ध्वजारोपणम्' इति प्राच्यशास्त्रोपदेशमनुस्मरन्तो नानुस्मरन्तो वा लोकेष्वायतां वृत्तिमनुरुन्धाना एव प्रतिगेहं प्रायेण प्रमोदप्रसन्नान्तःकरणा महोत्सवं समनुतिष्ठन्ति । द्वारे मङ्गलकुम्भं स्थापयन्ति, ध्वजपताकादिकमारोपयन्ति, पुष्पपल्लवादिभिः सदनसज्जामुपकल्पयन्ति, साहित्यरससमास्वादनपटवो वर्षमङ्गलकाव्यमालोचयन्ति, काव्यरचनाचतुरा नववर्षमङ्गलं काव्यसम्पदा सम्यगभिघोषयन्तः परितृप्यन्ति, परितर्पयन्ति चान्येषां काव्यवासनावासितान्यन्तःकरणानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये व्यतीते संवत्सरे वाणिज्यादौ विशेषभव्यलाभेन नितरां प्रसन्नास्ते भाविनि संवत्सरे तदतिशायिभव्यसम्पातमाशासानाः शुभादृष्टफलकमाय-व्ययलिपिपुस्तकपूजादिकमतिश्रद्धया समाचरन्ति। स्वजनगणानानन्देन समाकारयन्ति, मनसा वाचा क्रियया च सौजन्यं प्रकटयन्ति, विचित्ररस-संभृतैरन्नपानाद्युपकरणसम्भारैरभ्यागतान् सन्तर्पयन्ति, मधुरयन्त्रझङ्कारा-द्युपस्कृतैः सङ्गीतादिप्रबन्धैः प्रीणयन्ति, सम्मर्दमुपेयुषामभ्यागतानां कल-कोलाहलैः सर्वा दिशो विदिशश्च मुखरयन्ति। येऽपि व्यतीते संवत्सरे समुपनतेन विपत्पातेन सुतरां विद्रूनास्ते 'चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च' इत्यादिनियमाननुस्मरन्तो भाविनि काले व्यतिक्रान्तवर्षदशा-व्यतिक्रमेण भव्यसम्पातमात्मनीनं भवितव्यं कल्पयन्तः सन्तमसमान्तः-करणिकं परिहरन्तः शान्तिमन्तो नवीनवर्षारम्भसम्भवे प्रमोदकदम्बके चित्तार्पणेन सुप्रसीदन्ति।

अनेनैव सार्वभौमेन भव्यकल्पनानुबन्धेन सुरक्षितः सर्वथा भाविक-भवानुषङ्गः। परोक्षं भव्यमभव्यं वा विज्ञातुमशक्नुवन्त एव जनिभाजो भाविभव्यलिप्सया तदौपयिकेषु व्याप्रियन्ते, रमन्ते च फलप्रतिपत्तिकालं यावद् विपुलप्रयत्नेन स्वीयकृत्येषु। फलप्रत्यासत्तेरुत्तरन्तु केचिद् दुःखाभि-घातैरभिहन्यन्ते, सुखोपरागेण वोपरज्यन्ते। तदत्र भवितव्यानां वस्तूनां परोक्षतापक्षप्रक्षेपक्षमं विधिदाक्ष्यमक्षीणश्रद्धया समभिनन्दन्तः परिप्राप्त-वर्षभाविनमनपघातं कल्याणव्रातं सर्वतः सर्वत्र सम्भावयन्तः स्वीयकर्त्तव्य-वस्तुषु वयं प्रवर्त्तामहे, प्रार्थयामहे च तत्रापि व्यतीतकाल इव सुमहतीं साह्यानुकम्पां भगवच्चरणपङ्कजपरागोपकण्ठ इव समीपतः श्रीमतां परिषद्-बान्धवानाम्।

अथेदानीमन्ते पत्रिकानुषङ्गि किञ्चिद् व्याजिहीर्षामः।—व्यतीते संवत्-सरे येन नियमेन यया प्रकृत्या यया चाकृत्या पत्रीमेनां सम्पादितवन्तः, प्रवर्त्त-मानेऽपि वर्षे प्रायेणामूं तथैव वयं सम्पिपादयिषामः। केवलमस्मिन् वत्सरे श्रौतसूक्तिलौकिकसूक्तिभ्यामर्वाक् प्राक् च नियमतः समुपात्ताया मतिमञ्जर्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'मासवार्त्तिकम्' नाम स्तोकात्मानं निबन्धविशेषमुपन्यस्य कलया नवीनां प्रकृतिमस्याः संघटयिष्यामः। तत्र च मासवार्त्तिके तत्तन्मासस्य विशेषकृत्यानि धर्मसंरक्षणसंस्थापनाद्यनुबन्धीनि यथासम्भवं निवेदयिष्यामः, प्रकटमुपादास्यामहे च दैवतानां तथा महापुरुषविशेषाणां पुण्यप्रादुर्भावादिमहनीयविशेषान्। तन्मन्यामहे तेन प्रबन्धेनानुवृत्तेन संस्कृतसाहित्ये धर्मे च सुतरामनुरागवतामस्मद्बान्धवानामसन्दिग्धानन्दसन्दोहः स्वान्ते पदं दधीत। अथ सर्वतः पर्यन्ते स्वल्पवित्ता संस्कृत-साहित्य-परिषत पत्रिकाया विपुलवित्तव्ययसाध्यामाकारवृद्धिं मनोरथशतेनापि कर्त्तुमपारयन्ती सावसादा निरन्तरं सश्रद्धान्तरं श्रीभगवतः सर्वेशानस्य पादपङ्कजयोस्तस्या आकारवृद्ध्यनुगुणां वैत्तिकशक्तिपरिवृद्धिं कामयते। नितरामत्र न चिरेणानुकम्पतां निष्कम्पशक्तिः श्रीभगवानिति शम्।

अखिलभारतवर्षीय-देवभाषापरिषदः सप्तदशमहाधिवेशने
सभापतिपदमलङ्कुर्वतां
महामहोपाध्याय-श्रीचिन्नस्वामिशास्त्रिणाम्

अभिभाषणम्

(पूर्वानुवृत्तम्)

(६) अन्ये च बहवो विदेशीया आस्माकीनाश्च विपश्चिद्वरा अनुभवशालिनः अत्रैव महतोऽस्य देशस्य बहुविस्तृतस्य बहुप्रकारभिन्नस्य एकसूत्रीकरणकौशलमन्तर्नीतं वर्वर्तीत्याशेरते।

(७) हिन्दीभाषाभाषिणोऽपि बहवो वृत्तपत्रसम्पादका लेखनकुशलाश्च सुरभारत्या एव राज्यभाषात्वं हृदयेन कामयन्ते।

(८) प्रगते सप्ताहे दक्षिणभारते अण्णामलै-विश्वविद्यालये स्नातकाना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुपाधिवितरणोत्सवे समागतः France फ्रान्स्देशीयो विद्वत्प्रवरो भारते संस्कृतस्यैव राष्ट्रभाषात्वं सङ्गतमुचितं चेत्यात्मीयमाशयमाविरकरोत्।

(६) दरभङ्गानगरे अचिरनिर्वृत्ते प्राच्यविद्यासम्मेलने समवेताः परःशताः पण्डितवरा ऐकस्वर्येण देववाण्या राष्ट्रभाषात्वं समार्थयन्।

पूर्वोक्तहेतुभिरस्या एव सुरसरस्वत्या राष्ट्रभाषात्वे औचिती आवश्यकता च प्रायशो विज्ञवराणां मनसि समुन्मिषतीति प्रतीयते करबदरवत्। सति चैवमेतस्यास्य सम्पादने सर्वैः संस्कृतानुरागिभिः देशोन्नतिं यथावदभिलषद्भिः सम्भूय समुत्थातव्यम्। साधुना पथा स्वाशयो बहुजनाशयश्च बहिः प्रकाशं प्रापणीयः। भारतीयानामस्माकमनल्पेन भाग्योदयेन प्राप्तमिदं स्वातन्त्र्यमनन्तरं परःशतेभ्यो वर्षेभ्योऽस्माभिः। अस्मदीया एव, अस्माकं भ्रातृतुल्या एव, आस्माकीनसंस्कृतिसंस्कृता एवेदानीं शासकपदमलंकुर्वाणा अलङ्कर्मीणा राज्यधुरं वहन्तीति कियानानन्दस्य विषयोऽयमस्माकम्। सर्वथा वयमत्र साह्यं कुर्वाणा भगवन्तं सर्वेशानमभ्यर्थयामहे;—अचिरप्राप्तेयं स्वाधीनता प्रतिकलमेधमाना, एतेषां मान्यतमानां भ्रातृचरणानां करकमलादनितरसाधारणीमनुच्छेद्यां सर्वाङ्गीणसौन्दर्यां देशस्यास्य परमामुन्नतिं विदेशीयामप्यधरीकुर्वाणां प्रापयेत्, भारतसंस्कृतिरपि देशान्तरीयपुरुषहस्तगता, शतशो विशीर्णा, कथं कथमपि धारयन्त्यद्ययावदात्मानम्, इतः परं दीप्तिमती समुज्ज्वलेदस्मद्भ्रातृस्कन्धमारूढा, सुतेव, सोदरीव, जननीव च सप्रेम सादरगौरवं परिपाल्यमाना, परिपोष्यमाणा च सर्वोत्तरा विराजेत भुवि। तदर्थममीषामस्मद्भ्रातृचरणानां राज्यधुरामाबिभ्रतां परिपूर्णमायुः, परमां च शारीरीं मानसीं च शक्तिं स दत्त्वेमाननुगृह्णात्विति। सर्वथा वयमाशास्महे भारतीया संस्कृतिरियं बहुतरं परिपुष्येत परिवर्ध्येत चेति। यतो ह्येतेषामेतदर्थमेव चिरसम्भृतोऽयमुद्यमः। न वयं कदापि विस्मर्तुमीश्महे भारतदेशस्यास्य भारतदेशीयायास्संस्कृतेश्च भग्नावशेषायाः पुनरभ्युत्थापनाय कियांस्त्यागः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतः, कियद्दुःखमनुभूतम्, कियद्वारं वा कियन्ति वा कारागाराणि पावनीयान्यासन्, कियान् कियान् वा दण्डाघातस्सोढव्य आसीदिति। सर्वेभ्य एभ्यः कृच्छ्रेभ्यः असहनीयेभ्यः पर्यपालयदिमानस्मद्भ्रातृचरणान् भूतभावनो भगवान् भारतदेशस्य भारतीयायास्संस्कृतेश्च पुनरुज्जीवनाय वेति किमियमतिशयोक्तिः ? एतदर्थमेव च महात्मनां गांधीमहोदयानां भारत-भूमौ भगवता जनिर्लम्भिता। तैश्च सर्वैषणापरित्यागेन, अनुक्षणमेतदर्थ-मेव स्वममूल्यं क्षपयित्वा जीवनम्, अन्ततः प्राणपणेनाऽपि परेषां हस्ता-दाच्छिद्य विना रुधिरलवपातं, विनैव च प्राणिघातमहिंसाशस्त्रेणैवा-भेद्येन प्रापिता स्वाधीनतेति कथनमिदं किं न तथ्यम् ? पं० नेहरू महोदयः, पं० श्यामाप्रसादमुखोपाध्यायमहाशयः, सर्दार् पटेलमहोदय-श्चेतीमे परे च भारतसंस्कृतिसम्भृतय एव लब्धोदया रात्रिन्दिवं तदर्थमेव निरुच्छ्वासं प्रयतन्त इति को वा न जानाति सचेतनः ? यदिदानीमास्मा-कीना संस्कृतिरेतेषां महामहिमशालिनां पुरुषधौरेयाणां करकमलादभ्युदयं नाधिगच्छेत्, तर्हि कतमस्स समयो, यमियं तपस्विनी परिपाल्यावतिष्ठेत। वयं तु ब्रूमः श्रुतिवचनेन ;—'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः'—इति। अतस्सर्वथाऽस्माभिरयं हस्तगतस्समयो न परिच्या-वनीयः, दृढं परिकरमभिनवं च बद्ध्वा प्रयतनीयम्।

यदि चैवम्, तर्हि तस्याः समुन्नतिर्भारतभाषायां गैर्वाण्यामेवायतत इति सुदूरं गत्वाप्यभ्युपगमनीयं भवति। सा च पुरेव यावन्न राष्ट्रभाषात्वमा-पादिता, तावत् पङ्गुरिव मूकेव काणेव च बहिर्निसारिता न मनागपि प्रभवेत् स्वकार्यं साधयितुम्। अतोऽस्या राष्ट्रभाषात्वापादनं नान्तरीय-कमापद्यते। प्राचीनभारते न केवलमस्या राष्ट्रभाषापदे अभिषेक आसीत् व्यवहारोपयोगिता, जनभाषात्वम्, ग्रान्थिकत्वं, देवभाषात्वं च निसर्ग-सिद्धमासीदिति बहुधा बहुत्रोदघोषयाम। तामेव च दशामद्यास्यास्सम्पा-दयितुमीहामहे वयम्, न ततोऽधिकम्। तदवाप्तये च पूर्वनिर्दिष्टा महामात्या अनुरोद्धव्याः। तेषां मनांस्यत्र विषये प्रवणीकरणीयानि। यथेयमस्मा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कमभ्यर्थना तेषां कर्णकुहरं भूयो भूयः प्रविशेत, तथास्माभिः पूतेन शान्तेन च मनसा यतितव्यम् ।

अल्पश्रमसाध्यं संस्कृताध्ययनम्

भ्रमोऽयं यः केषाञ्चित—भाषान्तराध्ययनापेक्षया संस्कृतभाषाध्ययनं कठिनतरम्—इति, स सर्वथा सूनृतेन वचसा दूरीकरणीयः। स्वप्नेऽप्यदृष्टाश्रुततरां, लेखनोच्चारणयोर्महद्वैषम्यं दधतीं, अस्मद्देशाननुकूलामुच्चारणपरिपाटीमाबिभ्रतीं, विदेशीयभाषामधीत्य, तत्र तैरपि विस्मयनीयं प्रावीण्यमावहतामस्माकमस्मन्मस्तिष्केषु, अस्माकं रुधिराणुषु चिराय कृतवसतेः अस्मदेशीयायाः, अस्मदनुकूलतमाया भगवत्यास्सुरसरस्वत्या अध्ययनं न कदापि ततः कठिनतरं भवितुमर्हति। विभीषिकैव केवलमियम्,—संस्कृतभाषा कठिनेति, न वस्तुस्थितिः।

इदन्तु अवितथम्—यत कियतश्चन कालादारभ्य व्यवहारतो राष्ट्रतश्च परिच्यावितायाः, ग्रन्थमात्रेऽवस्थितताया अस्या भाषायास्तदानुगुण्यसम्पिपादयिषुभिस्तात्कालिकैर्विद्वद्भिः सैषाऽध्ययनाध्यापनादौ किञ्चिदिव काठिन्यमापादिता, परिवर्द्धिता च तदुत्तरकालिकैरपि, सैव दशाऽद्य यावदनुवर्तते। तामेव चेमां पुरतः प्रत्यक्षीकुर्वन्तः केचिदाशेरते,—संस्कृताध्ययनं कठिनमिति। परमियं स्थितिरचिरादेव परिवर्तयितुं शक्येत, परिवर्तने च गम्भीरं पाण्डित्यं भारतभूषायमाणमुच्छिद्येत इत्यप्याकस्मिकी निर्मूला च भीतिः केषाञ्चित। तत मात्रयाप्यबाधित्वैव पाठनप्रणाली पाठ्यावलिश्च काचिन्निर्मातुं शक्यते। परमिदमस्माभिरवधेयम्,—यावदियमद्यतनीं दशां परिहाप्य सर्वोपयोगक्षमा न सम्पाद्येत, तावद्राज्यकार्यमपि साधु निर्वोढुं न शक्नुयात। तत्सम्पादनाय च कालः कश्चिदपेक्ष्यते। तावतिमध्यकाले या काचिद्राष्ट्रकार्यं भाषा निर्वहतु। नास्माकं तत्र विप्रतिपत्तिः। विदेशीया भाषा परं, यास्मानद्यावधि समूलं चूषति स्म चुच्चूषाकारं, या च विधर्मिणां, नेतःपरं राज्यकार्यायोपयोजनीया। यथा चास्यास्सर्वा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्येयता सर्वोपकारक्षमता च भवेत् तादृशाः सरलतमाः सरलैरनुदिनं लोक-वार्तोपयुक्तैः ललितोच्चारणैरेव पदैर्ग्रथिता ग्रन्था निर्मापयितव्याः। तदर्थं च राजकीयाज्ञया, तैरेव वा काचन विज्ञानां विशेषविदां समितिर्निर्मातव्या, यस्याः कार्यं तत्तादृशग्रन्थनिर्माणनिर्मापणमुद्रापणादिकं मुख्यं भवेत। निर्मितानामविलम्बेन पाठ्यकोटिसमावेशनं च कारयितव्यम्। तत्तादृश्या-स्सरलसंस्कृतशिक्षायास्सर्वत्र पाठशालासु विश्वविद्यालयेषु च यथायोग-मनिवार्यतासम्पादनाय ते राजकीयास्ते ते विश्वविद्यालयाधिकारिणश्चा-नुरोद्धव्याः। यथा स्वयमेव छात्राणामहमहमिकया एतद्भाषाध्ययने स्वार-सिकी प्रवृत्तिर्भवेत् तथा लालित्येन प्रेम्णा चाध्यापनीयम्। सर्वेषां विषया-णामध्यापनाय विश्वविद्यालयेषु सौकर्यं सौलभ्यं च सम्पादनीयम्। प्रसङ्गे-ऽस्मिन् स्मृतिपथमागतमिदम्,—यत् कलिकाताविश्वविद्यालये गैर्वाणवाणी-विभागे तदनुबन्धिनां प्रायस्सर्वेषामेव विषयाणां पाठ्यत्वं निर्द्धारयन्तस्तदधि-कृता विश्वविद्यालयान्तरवत्तावन्मात्रेण सन्तोषमलभमानास्तत्तद्विषयाध्या-पनाय युक्ततमान् विबुधवरान् नियोज्य श्लाघनीयतमं प्रबन्धमकुर्वन् कुर्वन्ति चेति। विषयेऽत्र प्रथमगणनीयोऽयं कलिकाताविश्वविद्यालय इति नात्र संशीतिः। अतस्तदधिकारिणस्तत्प्रबन्धकाश्च सर्वथा प्रशंसनीयाः। विशेषतश्चात्र विद्याव्रताराणां स्यर् श्रीआशुतोषमुखोपाध्यायानां यशःकायेन जीवतां निरतिशयोऽवर्णनीयश्च श्रम एव निदानमिति तेभ्यो महामहिमभ्यः पुरुषधौरेयेभ्यः, तदुत्तरकालिकाय तथैव तत्र विश्वविद्यालये दत्तदृष्टये तत्-कुलाय च वितीर्णोपचारः सर्वथा विद्वद्वर्गस्तदधमर्ण इति नात्र बहु वक्तव्यम्।

एवं संस्कृतपाठशालासु विश्वविद्यालयेषु च कृताध्ययनानां छात्राणां लोकयात्रानिर्वहणाय भाषान्तराध्यायिनामिव सर्वेष्वपि विभागेषु वृत्तये द्वाराणि समुद्घाटितानि भवेयुः। वेतनादिषु उभयेषां मनागपि तरतमभावो न भवेत् इत्येतदर्थमपि आज्ञापनाय शासकगणोऽनुरोद्धव्यः। विशेषत-श्चामीषां संस्कृतच्छात्राणां वावदूकतागणप्रवेशेऽनुमतिर्दापनीया, तद्द्वारी-कृत्य अधिकरणेषु न्यायाधीशपदमप्येभिर्यथा लब्धुं शक्येत। एवं सर्वत्रा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिहतप्रसरा कृता सतीयं भाषा दैवी, तानि तानि स्थानान्यभिव्याप्य समेधमाना, अचिरेणैव कालेन राज्यकार्यं स्वयमेव निर्निरोधमादधाना पदं स्वीयां भारतभूमिमितरेभ्यो भूभागेभ्यः समुज्ज्वलयेत सर्वेष्वपि विषयेष्विति किमु वक्तव्यम् ? सर्वमिदमस्या राष्ट्रभाषात्वस्वीकरणसमनन्तरमेव सेत्स्यति ।

परमिदमेतावता लेखनेन वेदिकासु सोत्साहं भाषणेन च न सिध्येत। तदर्थं बहु यतितव्यम्। बहु क्लेशनीयश्चात्मा। पुनः पुनः प्रार्थनीयाश्शासकपदमधितिष्ठन्तोऽस्मद्भ्रातरः। आश्चर्यमिदमस्यामपि घोरतमायां परिस्थितौ किञ्चिदप्यविचारयन्तः, अविगणयन्तश्च तपस्विन्या भाषाया अस्याः पुरस्थितां शोचनीयतमां दशां मनागपि, सुखं शेरते पण्डितप्रवरा इति। तानिमान् सुरभाषोपजीविनः पूज्यतमान् वर्षीयसः, सुहृत्तमान् कनीयसश्च साञ्जलिबन्धमभ्यर्थये स्वकर्तव्यकरणाय ।

उपसंहारः

एवं पवित्रतमे कार्येऽत्र शुद्धेन शांतेन च मनसा यदि प्रयतेमहि परिश्राम्येम च तर्हि, यदि न स्यात् पञ्चसु वर्षेषु दशवर्षाभ्यन्तरे भाषायामस्यामास्माकीना राज्यकार्यं निर्वोढुं चारुरूपेण प्रभवेयुः, तेन वयं शक्नुयाम देशस्यास्य प्राचीनतमां परमोज्ज्वलां दशां पुनराहर्तुम्, ईशीमहि च भारतीयास्सर्वाः कलाः सर्वाश्च विद्याः प्रफुल्लयितुम्, तद्द्वारा देशान्तरेष्वपि आत्मनो गौरवं संवर्द्धयितुम्, अस्मद्देशे च सर्वत्र शान्तिं परमाम्, सौभिक्षं महत्, सौहित्यं विपुलम्, सौहार्दं च परमं परस्परमाधातुमिति सुदृढोऽमेद्योऽयमस्माकं विश्वासः। अत्रोद्यमः परं कर्तव्यः। "उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः। नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥" इति ह्यभियुक्तानामुक्तिः, किमन्यदिह वक्तव्यं विदुषां पुरतोऽवशिष्यते ? अतोऽत्रैवोपसंहारमिच्छन् अन्तेऽस्मत्प्रियसुहृदां कर्तव्यज्ञापनाय—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत कवयस्तरन्ति" ।
"उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु"

इति श्रुतिस्मृतिवचने स्मारयित्वा एतावतैव विरमाणि ।

ॐ शान्तिः शान्तिः शान्तिः ।

भवभूतिकालिदासतत्त्वम्

[निबन्धिका—श्रीमती वाणीराणी सिंहजा]

(पूर्वानुवृत्तम्)

नाटकेऽस्मिन् कवेस्त्रयीविद्यायामपि वैदग्ध्यं परिलक्षितम् । यदि च न कृतो वेदान्तदर्शनस्य समालोचनविस्तारः, तथापि कतिपयस्थानेषु उपदेशदानच्छलेन उपनिषत्सम्बन्धिनी वाणी समुल्लिखिता । नाटकस्य तुरीयेऽङ्के राजर्षिर्जनकः स्वगतं कथयति,—"अन्धतामिस्रा हि असुर्य्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते ये आत्मघातिन" इति । वाजसनेयसंहितोपनिषदपि एतदेव कथयति, "असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" इति । दृश्यते पुनरुपमाच्छलेन वेदान्तदर्शनस्याप्युत्कृष्टपरिव्यक्तिरुल्लिखिता षष्ठेऽङ्के । यथा

"विद्याकल्पेन मरुता मेघानां भूयसामपि ।
ब्रह्मणीव विवर्त्तानां क्वापि विप्रलयः कृतः" ।। इति ।

तत्त्वज्ञानोदये विवर्त्ता यथा ब्रह्मणि एव विलयं यान्ति, तथैव वायुप्रवाहेन घना विलीना भवन्ति इति समासतो वेदान्तसमालोचना कृता ।

आत्मग्लानिदीर्णहृदयोऽयौध्याधीशः सीतां प्रति प्रेम्णा स्नेहेन च समुच्छलितहृदयः सन्नाचष्ट,—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"विश्रम्भादुरसि निपत्य लब्धनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।
आतङ्कस्फुरितकठोरगर्भगुर्वीं
क्रव्याद्भ्यो वलिमिव निर्घृणः क्षिपामि ॥ इति (उः च ४९)

अपि च शम्बूकवधानन्तरं पूर्वाध्युषितं जनस्थानं परिभ्रमता जानकीं संस्मृत्य पूर्वसुखान्यनुभूय रामभद्रेणोक्तं यथा,—"सर्वथा प्रियारामा हि वैदेह्यासीत्, एतानि तानि नाम कान्ताराणि, किमतः परं भयानकं स्यात् ।" इति । पुनरत्र भवभूतिना संयोजितः कश्चिदपूर्वभावविशेषः । अपूर्वप्रेमशतदलसुगन्धेन विस्मयाक्षिप्तहृदयः सुधीकुलालिसन्तानो यदीयं रसमसकृत पिवति । यथा "अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति । तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥" इति

(क्रमशः)

मिथ्याप्रतिपत्तिः

वृथैव संवत्सरवृद्धिवैखरी
　　प्रतिक्षणं वर्षचयक्षयो हि नः ।
तथापि कामेषु चिरं रमामहे
　　नान्यक्षणे दृष्टिलवं भजामहे ॥

वृत्तवर्त्तिका

सुमहत् सौभाग्यमिदं महनीयप्रभावायाः संस्कृतसरस्वत्या यत् संस्कृतज्ञ-पण्डितसमाजस्य पश्चिमवङ्गीयस्य संस्कृतभाषाया राष्ट्रभाषात्वव्यवस्थापनाय दृश्यते महान् यत्नः । तथाहि नातिचिरात् पूर्वं कैश्चन पण्डितसमाजैः कलिकातावड़ वाजारस्थित-सत्यनारायणोद्याने काचित् सभा कृता, यत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषाया अनितरसाधारणं महत्त्वादिकं राष्ट्रभाषापदप्रतिष्ठायोग्यत्वञ्च सम्यगुपपादितम् । कियतो दिवसात् पूर्वञ्च कालीघाटपुण्यस्थानप्रतिष्ठित उद्वास्तुपूर्ववङ्गपण्डितसमाजः काञ्चित् सभां संघटितवान्, यत्र पाश्चात्त्य-चिकित्सायामतिप्रवीणाः एम्‌डिपदभाजः श्रीनलिनीरञ्जनसेनगुप्तमहाभागाः सभापतयः, अन्ये च केचन सुप्रतिष्ठा मनीषिणो विशेषकृत्यनिर्वाहकपदे सभास्तारैः ससम्मानं वृता अभूवन् ।

विहारप्रदेशलब्धजन्मा नातिचिरात् पूर्वं वङ्गेषु प्रथितपदा निखिल-भारतवर्षीयदेवभाषापरिषदपि बहोः कालादेव तदर्थं प्रयत्नपरा परामृश्यते। तदनेन व्यतिकरेण संस्कृतनिष्णातपण्डितसमाजस्य संस्कृतभाषाया राष्ट्र-भाषात्वं सुतरां काम्यमिति प्रतिपद्यते। परं यावता यत्नपर्यायेण भाषान्तरस्य प्रभावं पराभूय संस्कृतभाषा राष्ट्रभाषाधिकारमुपगन्तुमीष्टे, नैतावन्मात्रकः प्रयत्नस्तावान् । बहव एव राष्ट्राधिकृताः सुमहान्तः पुरुषा अपि भाषान्तरस्यैव राष्ट्रभाषात्वमन्तःकरणश्रद्धया समनुमोदन्ते, बहिश्च तदुपयुक्तं विधानं प्रवर्त्तयितुमीहन्ते । पुनः पुनरेव निपुणैरुपदर्श्यमानमपि भाषान्तरस्य राष्ट्रभाषात्वे दोषसम्पातं संस्कृतभाषाया राष्ट्रभाषात्वे च प्रभूतगुणानुबन्धं गजनिमीलिकया समुपेक्षन्ते । तदत्र पृथक्कृतया तत्तत्-पण्डितसमाजानां प्रयत्नेन तेषामेव मनोरथो न तथा सिद्धिपथमुपेयाद्, यथा सम्भूय तेषामेतदर्थमुपाहितेन प्रयत्नेन । तत् सम्भूय सम्भावयन्तु सर्वे पण्डितसमाजाः स्वाभीष्टसिद्धये यत्नं, परिहरन्तु मिथो विद्वेषसङ्घातं, प्रवर्त्तयन्तु तत्र तत्र प्रथिताधिकारेषु तस्या योग्यतायां विश्वासं, लम्भयन्तु च दीनां संस्कृतभारतीमधिकारानुरूपं सुयोग्यं महिमानमिति सनिर्बन्धं वयमर्थयामहे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

Reg. No. C 1073

Vol. XXXII. No. 4. August 1949

३२श-वर्षस्य ४र्थ-संख्या १८७१-शकीये श्रावणे मासे

भारते मातृ भारती

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—14s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SOME BACK VOLUMES

OF THE

Sanskrit Sahitya Parishat Patrika

AVAILABLE FOR SALE

Price :—Volumes upto 10th year Re. 1/4 per copy
,, From 11th to 20th year Re. 1- per copy
,, ,, 21st to 31st ,, ,, /12/- ,, ,,
Current /8/- per copy

(Postage and Packing charges to be paid extra.)

Apply to the Secretary,

SANSKRIT SAHITYA PARISHAT

17, R. G. Kar Road,
P.O.—Shyambazar, Cal. 4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXII. No. 4. | १८७१-शकीये श्रावणे ३२श-वर्षस्य ४र्थ-संख्या | August. 1949.

074833

श्रौतसूक्तिः

अग्निना रयिमश्नवत्
पोषमेव दिवे दिवे ।
यशसं वीरवत्तमम् ॥

———

तदनुवर्त्तिनी

लौकिकसूक्तिः

हुताशनाद् वित्तमुपैति लोको,
यदक्षयं प्रत्यहमेति वृद्धिम् ।
दानादिना यस्य यशः प्रकामं
मिलन्ति यस्मात् स्वजनाः प्रभूताः ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मासवार्त्तिकम्

हिन्दोलनं नन्दसुतस्य पुण्यमेकादशीतः किल पूर्णिमान्तम् ।
संसाध्यते वैष्णवभक्तवीरैर्यस्माच्चतुर्वर्गफलोपलम्भः ॥
जन्माष्टमी पुण्यतमात्र मासे श्रीकृष्णचन्द्रस्य महोत्सवाढ्या ।
नन्दोत्सवो गोपजनप्रमोदी तदुत्तराहे नियमादुपेतः ॥
स्वाधीनतालाभमहोत्सवोऽस्मिन्नाधीयते भारतभूमिजातैः ।
चिरात् परं भारतभूमिरेषा यत्र स्वतन्त्राजनि भाग्ययोगात् ॥
विद्यासागर ईश्वरः सुरपुरं यातो जगद्विश्रुतः
श्रीरूपः किल वैष्णवप्रभुरगाद् वैकुण्ठलोकस्थितिम् ।
वाणीसिद्धकवी रवीन्द्रविबुधो देहं जहौ पार्थिवं
मासेऽस्मिन्नत एष गर्ह्यपदवीं गन्ता नु मासो ध्रुवम् ॥

मतिमञ्जरी

श्रीमन्तः पारिषदाः ! महती व्यापत् समापतिता भारते वर्षे दिनपञ्जी-सिद्धान्तभेदेन । तथापि गुप्तप्रेश-पञ्जिकादयो गतानुगतिमनुरुन्धाना यमर्थं सिद्धान्तयन्ति बहुत्र विशुद्धसिद्धान्तपञ्जिकादयस्तदन्यमर्थं सिद्धान्तरूपेण विघोषयन्ति । तिथिकृत्यादौ न खलु द्वयोरेव शक्यं प्रामाण्यमभ्युपगन्तुम् । तत्तयोरेकतरं सिद्धान्तमनुवर्तमानानां तत्र तत्र धर्मकृत्यादौ प्रवृत्तिः समर्था वा स्यादसमर्था वा स्यादिति को वा वक्तुमीष्टे । लौकिकेष्वर्थेषु यथा तथा वा भवतु, अलौकिकार्थेषु पूजादिव्यापारेषु कालविशेषमधिकृत्य कर्त्तव्येषु सुतरामफलस्तावद्द्वयोरेकतरः पक्षः । तदद्य सुदूरातीतकालवद् वर्त्तमाने काले प्रायो नादृष्टफलानि कृत्यानि फलं प्रसुवत इत्यत्र तदेव वा निदानभूमिकां विन्देत । तद् यावत् सर्वासां दिनपञ्जीनां गणनापद्धतिस्तत्सूत्राणि च सर्वैः पञ्जीनिर्माणपरैर्विद्वद्भिरैकमत्येन नैव परिगृह्येरन् नैव शक्यमिदं तावदत्येतुम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतीते काले कदाचिदनयैव बुद्धया माननीयस्वर्गताशुतोषमुखोपाध्याय-प्रमुखैर्महात्मभिरेतदधिकृत्य महत्यारभट्या विशेषतो विचारः प्रारब्धः कृतश्चा-नेकसभाद्यनुष्ठानप्रबन्धः। परं न जानीमहे कुतः कारणात् फललाभ-कालाद् बहिरेव तत्कृतः प्रबन्धो निवृत्तिपथमाशिश्राय। वयमद्य पुनरपि धर्म्यकर्मप्रियाणां महतां पुरतः प्रकृतकृत्यपरिग्रहाय प्रस्तावमुपस्थापयामः। यदि धर्मो विपर्यस्तः कालकलाविपर्ययेण, किमन्यदवशिष्टं सर्वतः समुत्कर्ष-निदानं भारतवर्षस्येत्यत्र न किं सर्वविनिर्मोकेण दृष्टिरस्माभिराधेया? तदत्र प्रवर्ततामचिरेणैव प्रेक्षावतां प्रेक्षा। निवर्ततां सर्वत्र भरतखण्डे धर्मकृत्यादीनां प्रचरद्रूपं कालवैषम्यमिति शम्।

छन्दोगक्रियासारः

(गोभिलीयप्रमाणसहकृत-छन्दोगानुष्ठेयक्रियाकलापः)

[निबन्धकः—श्रीरमणीकान्तसिद्धान्तरत्नः]

अथ पार्वणश्राद्धम्। अपराह्णे नवममुहूर्तादौ श्राद्धपर्युदस्तेतर-काले वा एतत् कर्तव्यम्। दिवसस्य प्राङ्मुहूर्तत्रयं शेषमुहूर्तत्रयञ्च आभ्युदयिकेतरश्राद्धे पर्युदस्तम्। पूर्वेद्युः श्राद्धाहे वा ब्राह्मणानुपनिमन्त्र्य (क) दैवे युग्मान् पित्र्ये अयुग्मान् मातामहपक्षेऽपि तथा, असम्भवे दैवादिपक्षत्रये सर्वत्रैव एकैकं ब्राह्मणं स्थापयेत् (ख)। यथोक्तब्राह्मणाना-

---

(क) "तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा" इति गोभिलीयश्राद्धसूत्रम् ।५।

(ख) "स्नातान् शुचीनाचान्तान् प्राङ्मुखानुपवेश्य दैवे युग्मान्"। इति श्राद्धसूत्रम् ।१६।

"अयुग्मान् यथाशक्ति पित्र्य एकैकस्योदङ्मुखान्" इति श्राद्धसूत्रम् ।१७।

"द्वौ वा दैवे त्रीन् पित्र्ये" इति श्राद्धसूत्रम् ।१८।

"एकैकमुभयत्र वा" इति श्राद्धसूत्रम् ।१९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मलाभे ब्राह्मणप्रतिनिधीन् कुशमयद्विजान् कृत्वा श्राद्धं कुर्यात (ग)। कुशमयब्राह्मणपक्षेऽपि सर्वमेव प्राकृतं कल्पमनुतिष्ठेत (घ)। पूर्वदिने कृतनिरामिषैकभोजनः परदिने कृतनित्यक्रियो द्विवासा दक्षिणाप्लावने देशे दक्षिणाभिमुखीभूय कृतपादशौचो दर्भपाणिः प्राङ्मुख उदङ्मुखो वा सकृदाचम्य (ङ) पाषाणास्थिशर्करेष्टकादियुतां पङ्किलां कृमियुक्तां दुर्गन्धाम् अनिष्टशब्दां भूमिं त्यक्त्वा गोमयोपलिप्तायां भूमौ दर्भासने चोपविश्य तैलेन घृतेन वा दीपं प्रज्वाल्य भोज्यादिकमुत्स्रष्टव्यम् (च)। यथा—एते

(ग) "यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीनामिव शालयः" ॥ इति कर्मप्रदीपः।
"ब्राह्मणानामसम्पत्तौ कृत्वा दर्भमयान् द्विजान्।
कृत्वा श्राद्धं विधानेन पश्चाद् विप्रेषु दापयेत्" ॥ इति परम्पराश्रुत-वचनम्।

"कौशान् ऋषीन् स्थलस्थान्"...इत्यादि छन्दोगपरिशिष्टम्।

(घ) "यद्युवा उभयं चिकीर्षेद्धोतञ्च ब्रह्मत्वञ्चैवेतेनैव कल्पेन छत्रं वोत्तरासङ्गं वोदककमण्डलुं दर्भवटुं वा ब्रह्मासने निधाय"...इत्यादि गृह्यसूत्रे 'तेनैव कल्पेन' इत्यनेन तत्रभवान् गृह्यकारः कुशमयब्राह्मणपक्षेऽपि सर्वमेव प्राकृतं कल्पमनुजानाति। एतेन कुशमयब्राह्मणपक्षे प्रश्नोत्तरादिकं स्वयं कर्त्तव्यमिति प्रतीयते। तथाच श्राद्धप्रकरणे सत्यव्रतः—"निधाय दर्भचयमासनेषु समाहितः प्रैषानुप्रैषसंयुक्तं विधानं परिकल्पयेत्" ॥ प्रैषः प्रश्नः। अनुप्रैषः—प्रैषादनु यो भवति सोऽयम् अनुप्रैषः, प्रत्युत्तरमिति यावत्। तथा संवत्सरप्रदीपे पैठीनसिः—"अलाभे ब्राह्मणानाञ्च श्राद्धं स्यात् कुशपत्रके। प्रश्नोत्तरं स्वयं कुर्यादिति धर्मो व्यवस्थितः" ॥ इति।

(ङ) "होमे भोजनकाले च सन्ध्ययोरुभयोरपि। आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत्।" इति गृह्यासंग्रहवचनात् श्राद्धेऽपि सकृदेवाचमनम्।

(च) 'श्राद्धं दानमुखं कार्य'मित्युक्तिवशाद् भोज्यादिदानं यथाशक्ति कर्त्तव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धपुष्पे ॐ सोपकरणभोज्याय नम इति त्रिः सकृद्वाऽभ्यर्च्चर्य्य एते गन्धपुष्पे एतदधिपतये ॐ विष्णवे नमः इति, एते गन्धपुष्पे एतत्सम्प्रदानाय ॐ ब्राह्मणाय नमः इति च संपूज्य कुशतिलजलान्यादाय ॐ अद्येत्यादि अमुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकदेवशर्मणः इत्यादि वृद्धप्रमातामहपर्यन्तं षण्ष्ठ्यन्तं षनामान्युच्चार्य पार्वणश्राद्धवासरे पुनरमुकगोत्रस्य पितुरमुकदेवशर्मणः इत्यादि वृद्धप्रमातामहपर्यन्तं षष्ठ्यन्तं नामोच्चार्य स्वर्गकामो विष्णुप्रीतिकामो वा इदं सोपकरणभोज्यमर्च्चितं विष्णुदैवतं यथासम्भवनामगोत्राय ब्राह्मणायाहं ददे (छ) इत्युत्सृजेत्। ततः ॐ वास्तुपुरुषाय नमः इति वास्तुपुरुषं संपूज्य तस्मै अन्नं दत्त्वा ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततमित्युच्चार्य ॐ यज्ञेश्वराय नमः इति यज्ञेश्वरं संपूज्य तस्मै अग्रभागं दत्त्वा परकीयभूमौ चेत् तत्स्वामिने मूल्यम् अथवा अन्नम् एतद्भूस्वामिपितृभ्यः स्वधा इत्यनेन दद्यात् (ज)।

(छ) ददङ् दाने इत्यस्य स्वरितत्वाद्यभावात् कर्तृगामिनि अकर्तृगामिनि च क्रियाफले सर्वत्रैवात्मनेपदं प्रयोक्तव्यम्। दाञ्धातोः प्रयोगे तु अकर्तृगामिनि फले ददामीति परस्मैपदमेव युक्तं, नतु ददानीति, लोडर्थस्य तत्राप्रवेशात्। यत्तु 'सकृदंशो निपतति सकृत् कन्या प्रदीयते। सकृद् वदेद्ददानीति त्रीण्येतानि सकृत् सकृत्।' इति मनुवचनम्, तत्र 'ददानीति सकृद्वदेदि'त्यनेन सर्वत्र दानवाक्ये 'ददानी'ति प्रयोक्तव्यमिति नार्थः, कर्त्रभिप्राये क्रियाफले व्यभिचारात् अन्यथापि तदर्थस्य संघटनात्। दानार्थकवाक्यन्तु सकृदेव वक्तव्यमिति तात्पर्यम्। 'अहमस्मै ददानीति एवमाभाष्य दीयते' इति छन्दोगपरिशिष्टवचनन्तु दानविमुखस्य गुर्वादेरनुमतिप्रार्थनार्थमेव तत्रैवोक्तम्।

(ज) गृह्याद्यनुक्तमपि श्राद्धपूर्वकाले वास्तुपुरुषाद्यर्च्चनं कर्त्तव्यत्वेन प्रत्यागच्छति नो हृदयम्। यतो यत्र यत् किञ्चित् क्रियते तत्र तदधिष्ठात्री देवताऽर्च्चनीयेति यज्ञेश्वरवास्तुपुरुषावर्च्चनीयौ। तथास्वामिकभूमावेव श्राद्धकरणस्य प्रशस्ततया परस्वामिकभूमेर्मूल्यादिप्रदानं न विरुध्यते। पुराणादौ चैतद् दृश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वं दैवकृत्यं प्राङ्मुखः पातितदक्षिणजानुरुपवीती ऋजुदर्भैः कुर्यात्। सर्वञ्च पितृकृत्यं दक्षिणामुखः पातितवामजानुः प्राचीनावीती द्विगुणभुग्नदर्भैः कुर्यात् (झ)। दैवे प्रागग्रदर्भद्वितययुक्तयवोदकप्रोक्षितानि आसनानि पश्चिमदिश्युपकल्प्य पित्र्ये च दक्षिणाग्रैकदर्भयुक्ततिलोदकप्रोक्षितानि आसनानि दक्षिणस्यां दिशि उपकल्प्य दैवे युग्मान् पश्चिमाग्रत्वेन प्राङ्मुखान्,(ञ) पित्र्ये अयुग्मान् दक्षिणाग्रत्वेनोदङ्मुखान् उभयत्र एकैकं वा दर्भवटुं स्थापयेत्। (ट) ततः पवित्रपाणिरासीनः (ठ) आदौ सर्वब्राह्मणान्

(झ) 'प्राङ्मुखकरणञ्चानादेशे' इति गृह्यकारवचनाद् दैवकृत्ये प्राङ्मुखत्वमवगम्यते। प्राङ्मुखानामुपवेशनस्य सूत्रणाच्च प्राचीदिगागता चेन्न युज्यते विना कारणमुत्स्रष्टुम्। कात्यायनोऽप्याह कर्मप्रदीपे,—

"यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु।
तिस्रस्तत्र दिशो ज्ञेयाः प्राची सौम्याऽपराजिता" ॥ इति ३।१।१ख

अत्र सौम्या उत्तरा, अपराजिता ऐशानी।

"दक्षिणं पातयेज्जानु देवान् परिचरन् सदा।
पातयेदितरज्जानु पितॄन् परिचरन्नपि" ॥ इति कर्मप्रदीपः।

५।१प्र।२ख

"पितृयज्ञे त्वेव प्राचीनावीती भवति" इति गोभिलः।

दक्षिणाप्लावने देशे दक्षिणाभिमुखस्य ते।

दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र क्रमः स्मृतः"। इत्याभ्युदयिकप्रकरणीयच्छन्दोगपरिशिष्टवचनाद् (४।१।४) दक्षिणाग्रेषु दर्भेषु पितृब्राह्मणान् संस्थाप्य दक्षिणामुखः कर्म कुर्यात् इति प्रतीयते। दक्षिणाया दिशः पित्र्यत्वाच्च दक्षिणा दिगेवायातीति हृदयम्।

(ञ) प्राङ्मुखकरणञ्चानादेशे इत्यादि प्रागेव दर्शितम्।

(ट) "मातामहानाञ्चैवम्" (२०) इति श्राद्धसूत्रेण ब्राह्मणान् निमन्त्र्य श्राद्धं कुर्यादिति मातामहपक्षेऽपि कृत्स्नविध्यतिदेशः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निमन्त्र्य दैवब्राह्मणौ ब्राह्मणं वा संस्नाप्य ताभ्यां तस्मै वा आचमनोदकं दत्त्वा ऋजुदर्भानादाय विष्णुरोम् तत् सत् ॐ अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकदेवशर्मणः अमुकगोत्रस्य पितामहस्यामुकदेवशर्मणः अमुकगोत्रस्य प्रपितामहस्यामुकदेवशर्मणः, अमुकगोत्रस्य मातामहस्यामुकदेवशर्मणः अमुकगोत्रस्य प्रमातामहस्यामुकदेवशर्मणः अमुकगोत्रस्य वृद्धप्रमातामहस्यामुकदेवशर्मणः पार्वणश्राद्धे कर्तव्ये पुरुरवोमाद्रवःसंज्ञकानां विश्वेषां देवानां पार्वणश्राद्धं दर्भमयब्राह्मणयोरहं करिष्ये (एकश्चेद् ब्राह्मणः ब्राह्मणेऽहमिति विशेषः) इति पृच्छेत् । (ड) ॐ कुरुष्व इत्यनुमतिः । ततः पितृपक्षे ब्राह्मणान् ब्राह्मणं वा संस्नाप्य तेभ्यस्तस्मै वा आचमनोदकं दत्त्वा दर्भानादाय विष्णुरोम् तत् सत् ॐ अद्येत्यादि...अमुकगोत्रस्य पितुरमुकदेवशर्मणः अमुकगोत्रस्य पितामहस्यामुकदेवशर्मणः अमुकगोत्रस्य प्रपितामहस्यामुकदेवशर्मणः पार्वणं श्राद्धं दर्भमयब्राह्मणेष्वहं करिष्ये (एकश्चेद् ब्राह्मणः ब्राह्मणेऽहं करिष्ये इति विशेषः) इति पृच्छेत् । ॐ कुरुष्व इत्यनुमतिः । एवं मातामहपक्षेऽपि पितृवद् ब्राह्मणं संस्नाप्य ब्राह्मणबहुत्वे तु ब्राह्मणान् संस्नाप्य तस्मै तेभ्यो वा आचमनोदकं दत्त्वा विष्णुरोम् तत् सदित्याद्युक्त्वा

"देवपूर्वं श्राद्धं कुर्वीत" इति सूत्रणाच श्राद्धस्य देवपूर्वकत्वमवगम्यते किन्तु "तन्त्रं वा वैश्वदेविकम्" (२२) इति सूत्राद् मातामहपक्षे वैश्वदेविकादन्यत्र तन्त्रता नास्तीति प्रतीयते । केचित् कुशमयब्राह्मणपक्षे अयोग्यत्वान्निमन्त्रणं नास्तीत्याहुः ।

(ठ) पवित्रपाणिर्दद्यादासीनः ॥ इति श्राद्धसूत्रम् (२५)

शुचीनाचान्तानित्यादिप्राकृतकल्पस्याभ्यनुज्ञानात् कुशमयब्राह्मणस्य स्नानं तस्मै आचमनोदकदानञ्च करणीयम् ।

(ड) अनुज्ञाऽर्थायत्तेति कृत्वा तत्रभवता सूत्रकारेण न सूत्रिता ।

इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः । नैमित्तिके कालकामौ काम्ये च धूरिलोचनौ । पुरूरवा माद्रवाश्च पार्वणे समुदाहृतौ । इति बृहस्पतिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीर + अवतीर्ण

अमुकगोत्रस्य मातामहस्यामुकदेवशर्मणः अमुकगोत्रस्य प्रमातामहस्य अमुकदेवशर्मणः अमुकगोत्रस्य वृद्धप्रमातामहस्यामुकदेवशर्मणः पार्वण-श्राद्धं दर्भमयब्राह्मणेऽहं करिष्ये (ब्राह्मणबहुत्वे तु ब्राह्मणेष्वहमिति विशेषः) ॐ कुरुष्व इत्यनुमतिः ।

(क्रमशः)

साहित्यविमर्शः

[निबन्धकः—व्याकरणसाहित्यविद्याप्रवीणः अप्पल्ल सोमेश्वरशर्मा]

(शास्त्रलक्षणादिकम्)

श्रीमेधादक्षिणामूर्तिं सच्चिदानन्दविग्रहम् ।
वटमूलाश्रयं वन्दे वर्षिष्ठमुनिवेष्टितम् ॥

इह खल्वनाद्यविद्याविलसिते शीतोष्णसुखदुःखादिबहुद्वन्द्वभूयिष्ठे जननमरणप्रवाहरूपे सच्चिदानन्दात्मकपरब्रह्मज्ञानैकनिवर्त्ये संसारे परिभ्रमणपरैस्सर्वैरपि पुरुषैरभिलषणीया अर्थाश्चत्वारः । ते च धर्मार्थकाम-मोक्षाख्याः । युक्तमेवैतन्नामैतेषां पुरुषैरर्थ्यमानत्वात्पुरुषार्था इति । एष्वादिमानां त्रयाणां 'त्रिवर्ग' इति समुदितानां 'चतुर्वर्ग' इति च "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गस्समोक्षकै" रितिरीत्या प्राचीनैस्समाख्या अकारि ।

केचिदत्र पुरुरवोमाद्रवसोर्विश्वेषां देवानामित्युल्लिखन्ति । अन्ये च—"उत्पत्तिं नाम चैतेषां न विदुर्ये द्विजातयः । अयमुच्चारणीयस्तैः श्लोकः श्राद्धसमन्वितः" । इति प्रचेतोवचनमनुसृत्य "आगच्छन्तु महाभागा विश्वे देवा महाबलाः । ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते" ॥ इति प्रचेतउक्तश्लोकमेव पठन्ति । तदत्र भूमिदेवाः प्रमाणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेषु मोक्ष एव परमः पुरुषार्थः। "न स पुनरावर्तते" इत्यादिश्रुत्या तस्य नित्यतावगमात्। इतरेषां त्रयाणां प्रत्यक्षादिसिद्धेन कार्यत्वरूपलिङ्गेन "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवाऽमुत्र पुण्यकृतो लोकः क्षीयते" इत्यादिश्रुत्या चाऽनित्यतावगमादिति प्रासङ्गिकोऽयं विषयः।

चतुर्विधानामेतेषां पुरुषार्थानां स्वरूपसाधनफलादिनिरूपकाः श्रुतिस्मृतीतिहासपुराणादयो बहव उपाया दरीदृश्यन्ते। तेषु श्रुतयो नाम चत्वारो वेदा ऋग्यजुस्सामाथर्वाख्याः। वेदार्थस्मरणपूर्वकं मन्वादिभिर्विरचिताः स्मृतयः। वेदार्थोपकारकाः पुरावृत्तात्मका रामायणमहाभारतादय इतिहासाः। वेदार्थोपकारका एव वंशवंशानुचरितसर्गप्रतिसर्गमन्वन्तरवर्णनविशिष्टा भागवतादयः पुराणानि। एवमेव यथा कथञ्चिद्वेदोपकारकाणि शिक्षाव्याकरणच्छन्दोनिरुक्तज्योतिषकल्पाह्वयानि षडङ्गानि भासन्ते। एषु श्रुतयोऽपौरुषेयाः। स्मृत्यादयस्तु सर्वे पौरुषेया एवेति संप्रदायः।

सर्वेषामेषामुपदेशशब्देन शास्त्रशब्देन च व्यवहारस्संदृश्यते। युक्तञ्चैतत्। तथाहि—उपदेशो नाम कर्तव्याकर्तव्यान्यतरबोधकं पौरुषेयाऽपौरुषेयान्यतर-वाक्यम्। तदेव शासनाच्छास्त्रमित्युच्यते। शास्त्रमिति 'शासु, (अनुशिष्टौ) धातोः करणे ष्ट्रन्प्रत्यये रूपम्। यत् कर्तव्याऽकर्तव्यान्यतरत् शास्ति पुरुषं तच्छास्त्रमिति भावः। तदुक्तमभियुक्तैः—"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।" इति।

शास्त्रञ्च वेदमूलकमेव सद्भिरादरणीयम्। नान्यत्। यथोक्तं पद्मपुराणे सप्तदशतमेऽध्याये—"अतो वेदविरुद्धार्थं शास्त्रोक्तं कर्म संत्यजेत्। स्वबुद्धिरचितैः शास्त्रैः प्रतार्येह च बालिशान्। विघ्नन्ति श्रेयसो मार्गं लोकनाशाय केवलम्। निन्दन्ति देवता वेदांस्तपो निन्दन्ति सद्विजान्। तेन ते निरयं यान्ति ह्यसच्छास्त्रनिषेवणात्। श्रुतिस्मृतिसदाचारविहितं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्म शाश्वतम् । स्वं स्वं धर्मं प्रयत्नेन श्रेयोऽर्थीह समाचरेत ।" इत्यादि । अतो वेदमूलकशास्त्रस्यैव परिग्राह्यता चकास्ति ।

(शास्त्रपरिगणना)

यद्यपि शास्त्राणि प्रसिद्धव्यवहारगोचराणि षट् । तानि च व्याकरण-पूर्वमीमांसोत्तरमीमांसासांख्यवैशेषिकन्यायनामकानि । एषामेव दर्शन-व्यवहारोऽपि दृश्यते । यथोक्तम्—"पाणिनेर्जैमिनेश्चैव व्यासस्य कपिलस्य च । कणादस्याक्षपादस्य दर्शनानि षडेव हि ॥" इति । अथापि पूर्वोक्तलक्षणाक्रान्तविषयत्वात योगच्छन्दोज्योतिरादीनामपि शास्त्रशब्देन व्यवहार उचितः ; जागर्ति च स लोके । तथाहि—यथा पदा-नुशासकत्व--कर्मनिरूपकत्व--ब्रह्मप्रतिपादकत्व--पदार्थपरिशीलकत्वादिलक्षणै-र्व्याकरणपूर्वोत्तरमीमांसान्यायवैशेषिकादीनां शास्त्रत्वव्यवहृतिः, तथैव ज्योतिश्छन्दःप्रभृतीनां वेदविहितकर्मोपयोगिकालादि-बोधकत्व-वेदसंरक्षण-सम्यग्विज्ञानाद्युपयोगिच्छन्दो-निरूपकत्वादिलक्षणैः शास्त्रत्वव्यवहृतिः ।

वस्तुतस्तु साक्षात्पुरुषार्थसाधनोपदेशस्वभाववद्वेदाऽविरोधिनं परम्परया पुरुषार्थसाधनोपदेशस्वभावं यं कमप्यपूर्वमर्थं यद् बोधयति तत्सर्व-मपि शास्त्रमिति वक्तुं युक्तमेवेत्युत्पश्यामः । अतः "इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत । बिभेत्यल्पश्रुताद्वेदो मामयं प्रहृ-रिष्यति ।" इत्युक्तरीत्या वेदोपकारकस्य इतिहासपुराणादेः, वर्णस्वरमा-त्रादिबोधिकायाः शिक्षायाः, वेदार्थनिर्वचनात्मकस्य निरुक्तस्य, मन्त्र-विनियोगेन क्रत्वनुष्ठानोपदेशकादेः कल्पादेरपि शास्त्रत्वं वक्तव्यमेव ।

अत एव हि शास्त्रपरिगणनायामव्यवस्थाऽनुभूयते । यथा—शास्त्राणि षडेवेति केचित । शास्त्रं चतुर्दशविधम् । तदुक्तम्—"अङ्गानि वेदाश्च-त्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्या ह्येता-श्चतुर्दश ।" इत्यपरे । "आयुर्वेदधनुर्वेदगान्धर्ववेदशिल्पवेदनामकानामुपवेदानां चतुर्णां चतुर्दशभिर्मेलने अष्टादश विद्या" इत्यन्ये । वार्तादण्डनीत्यो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिश्रणेन ता विंशतिरिति परे। वक्ष्यमाणलक्षणस्य काव्यालङ्कार-शास्त्रस्याऽपि संकलने एकविंशतिर्विद्या इति काव्यालङ्कारतत्त्वविदः। शास्त्रविद्याकलानां पारस्परिकं भेदमिच्छन्ति केचन। शास्त्रविद्ययोरभेदं कलानाञ्च पार्थक्यमभिलषन्ति परे। सर्वैक्यं समेषां शास्त्रव्यवहारञ्च वाञ्छन्त्यपरे। युक्तमितः शास्त्राणामानन्त्यमित्युट्टङ्कितुम्। "अनन्ता वै वेदा" इति वेदानन्त्यबोधिका अभियुक्तोक्तिर्यथा तथैव अनन्तानि वै शास्त्राणि" इति शास्त्रानन्त्यबोधिकाऽप्यभियुक्तोक्तिरवश्यमङ्गीकरणीया।

(साहित्यपदार्थः)।

एवं स्थिते विचार्यते साहित्यस्य शास्त्रत्वमस्ति न वेति। तत्र कस्तावत्साहित्यपदार्थः। उच्यते। साहित्यशब्दोऽयं सहितपदाद्भावे ष्यञन्तत्वेन व्युत्पादयितुं शक्यते। सहितशब्दस्य संयुतार्थकत्वात् परस्परं मिलितानां पदार्थानां भावस्साहित्यमिति सामान्येन व्युत्पत्त्यर्थो लभ्यते। इदञ्च पदं राजशेखरादय आलङ्कारिकाः प्रथममलङ्कारशास्त्रपरतया व्यवजह्रुः। "पञ्चमी साहित्यविद्या" इत्यादिना। क्रमेण रुय्यकविश्वनाथादिभिर्विरचितः "साहित्यमीमांसा" "साहित्यदर्पणा" दिभिर्ग्रन्थैः साहित्यपदं काव्यपरत्वेनालङ्कारशास्त्रपरत्वेन च लोके प्रसिद्धिं लेभे। अत्र हेतुं विचारयामः। प्राचीनैरालङ्कारिकाग्रणीभिर्भामहादिभिरादौ "शब्दार्थौ सहितौ काव्य"मिति काव्यलक्षणमुररीकृतम्। अनन्तरमानन्दवर्धनाचार्यादिभिर्विलक्षणे काव्यात्मनि महता संरम्भेण स्थापितेऽपि शब्दार्थयोः काव्यशरीरत्वं न दूरीकृतम्। मम्मटादिभिर्बहुभिश्च प्राचीनलक्षणमेवान्वसारि। एवञ्च काव्यपदस्य सामान्येन शब्दार्थावित्यर्थः। श्रूयन्तेऽत्र "ननु शब्दार्थौ काव्य"मित्यादयः काव्यानुशासकानां संवादाः। शब्दार्थौ सहितौ परस्परमवियुक्तौ। शब्दं विनाऽर्थो न वर्तते! अर्थं विना च न शब्द इति भावः। अत एव कविकुलतिलकः पार्वतीपरमेश्वरौ शब्दार्थाभ्यामुपामीयत। लोके न काऽपि भाषा, न किमपि संभाषणं, अन्ततो न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽपि व्यवहारश्च ऋते शब्दार्थाभ्यां प्रतिष्ठां लभते। अतः शब्दार्थयोःसमं प्राधान्यम्। अत्र माघकविसंवादोऽपि—"शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते" इति। एवं सति सहितयोः शब्दार्थयोर्भावः (संबन्धः) साहित्यमिति मत्वा तत्स्वरूपादिनिरूपकशास्त्रपरत्वेन साहित्यपदमुपयुयुजिरे किल।

(क्रमशः)

वृत्तवर्तिका

कलिकाताराष्ट्रीयसंस्कृतमहाविद्यालये स्वीयजन्मकालात् प्रभृति सुचिरं स्थिता 'वङ्गीयसंस्कृतसमितिः' (कलिकाता संस्कृत-एसोसियेशन्) यथा राष्ट्राधिकृतपुरुषैः 'वङ्गीयसंस्कृतशिक्षापरिषद्' इति नामान्तरं प्रापिता तथा स्थानान्तरमपीति विज्ञापितमेवाधस्तनसंख्यायामस्माभिः। ततसङ्केतश्च '१०।वि— इडेन् हस्पिटल्रोड्, कलिकाता' इति। तदितः प्रभृति पत्रव्यवहारादिकं सर्वैस्ततसङ्केतेनैव कार्यम्। अन्यथा यथाकालं पत्रादिकृत्यं नैव सम्पद्येत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishat Series

(Revised up to April, 1949)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; Rs. 2 (for members).

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya--Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16. **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof. Akshayakumar Shastri. Re. 2-8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M.A. Rs. 7-8 ; Rs. 6 (for members). Almost out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 17, R. G. Kar Road, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXII. No. 7.
३२श-वर्षस्य ७म-संख्या

November 1949
१८७१-शकीये कार्त्तिके मासे

भारते मातु भारती

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—14s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SOME BACK VOLUMES

OF THE

Sanskrit Sahitya Parishat Patrika

AVAILABLE FOR SALE

Price :—Volumes upto 10th year Re. 1/4 per copy
,, From 11th to 20th year Re. 1- per copy
,, ,, 21st to 31st ,, ,, /12/- ,, ,,
Current /8/- per copy

(Postage and Packing charges to be paid extra.)

Apply to the Secretary,

SANSKRIT SAHITYA PARISHAT

17, R. G. Kar Road,
P.O.—Shyambazar, Cal. 4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vol

সংস্কৃত-সাহিত্য-পরিষৎ
শ্যামবাজার, কলিকাতা।

ভারতে ভাতু ভারতী

অজ্ঞানকলুষরাশিবিনাশকারিণি
শ্বেতপদ্মনিবাসিনি হংসবিহারিণি।
বিপঞ্চীবাদনপরা বিতর করুণাধারা
দীনপুত্রগণে তব বাণি হে জননি॥
বুধ শ্রীপঞ্চমীযুত সোমদিবসে তে।
সরস্বতীপূজা হবে প্রার্থনা স্বাগতে॥

ইতি

১৩৫৬ বঙ্গাব্দীয়,
সৌরপৌষস্থ
দ্বাদশদিবসীয়া
লিপিরিয়ম্।

বিনীত—
পরিষদন্তেবাসিনাম্

माक्षैः प्रदेवीः कृषिकर्म धेहि
वित्ते रतः स्या बहुमानयुक्तः ।
गावश्च तस्माद् वनिता च रम्या
मन्वादिरूपः सविताख्यदेतत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXII. No. 7. | १८७१-शकीये कार्त्तिके ३२श-वर्षस्य ७म-संख्या | November 1949.

संस्कृतसाहित्यपरिषत्

श्रौतसूक्तिः

अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया
तन्मे विचष्टे सवितायमर्यः ॥

तदनुवर्त्तिनी

लौकिकसूक्तिः

माक्षैः प्रदेवीः कृषिकर्म धेहि
वित्ते रतः स्या बहुमानयुक्तः ।
गावश्च तस्माद् वनिता च रम्या
मन्त्रादिरूपः सविताख्यदेतत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मासवार्त्तिकम्

यस्मिंस्तुलाराशिमुपैति सूर्यः स कार्त्तिकः सौर इति प्रसिद्धः ।
आकाशदीपं ज्वलयन्ति सन्तः प्रतिप्रदोषं विधिनात्र मासे ॥
अत्रैव या भूतचतुर्दशीतिथिस्तस्यां प्रदोषे सुरमन्दिरादिषु ।
प्रदीपदानं यमतृप्तिहेतवे भूत्यै तथा शाकविशेषभक्षणम् ॥
तस्मिन्नमायां मनुजा विभूत्यै दीपान्विताकृत्यमलं चरन्ति ।
लक्ष्मीमलक्ष्मीमपि पूजयन्ति प्रदोषकाले ज्वलयन्ति चोल्काम् ॥
श्यामां वराभीतिकृपाणमुण्डलसत्करां दानवदर्पहन्त्रीम् ।
तन्त्रोक्तरीत्या परिपूजयन्ति भक्ताः सुता भव्यकृते निशीथे ॥
ततः पराह्णे किल वैष्णवानां गोपूजनाद्यं विविधं सुकृत्यम् ।
तत्रैव वृन्दावनदासनामा तिरोदधे पार्थिवदेहमुक्तः ॥
ततो द्वितीया तिथिरर्चिता या तस्यां यमाद्याः परिपूजनीयाः ।
भ्राता भगिन्या तिलकादिदानैर्दीर्घायुराशास्य विवर्द्धनीयः ॥
भ्रात्रा च तस्यै वसनादि देयं तदीयहस्तादपि भोज्यमन्नम् ।
प्रदेशभेदेन विभिन्नरूपो मन्त्रोऽत्र वाच्यस्तिलकप्रदाने ॥
कालक्रमेणात्र गतं प्रचारं भ्रात्रे भगिन्या वसनादिदानम् ।
ततश्च शुक्ला नवमी तिथिर्या त्रेतायुगं तत्र पुरा प्रवृत्तम् ॥
यस्मिद् युगे धर्ममयं धरायां श्रीरामराज्यं परितो विरेजे ।
कुण्डापदे धाम्नि च वैद्यनाथे कुण्डेश्वरी तत्र तिथौ प्रपूज्या ॥
तस्यां माता जगद्धात्री तन्त्रोक्तविधिनार्च्यते ।
यत्रैकदिवसे कार्या सप्तम्यादित्रिकक्रिया ॥
एकादश्यां समारभ्य तत्पराह्णे सुविश्रुतम् ।
पूर्णिमातिथिपर्यन्तं वकपञ्चकमीरितम् ॥
दिने दिने तत्र जनैर्विधेयं स्नानं नदीस्रोतसि सम्भवेन ।
हिंसा न कार्या न च मांसभुक्तिर्वकोऽपि नाश्नाति यदामिषाणि ॥
एकादशी या सितपक्षवर्त्तिनी तस्यां हरिर्मुञ्चति सुप्तिवैशसम् ।
तत्रैव सिद्धा किल भीष्मपञ्चकव्रतप्रवृत्तिः कुशलप्रवर्त्तिनी ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुत्तराहे खलु वैष्णवानां मते हरेरुत्थितिपुण्ययोगः ।
तदुत्तरस्मिन् दिवसे पवित्रे श्रीसन्तदासश्च तिरोबभूव ॥
श्रीपौर्णमास्यां प्रथिता पवित्रा श्रीकृष्णलीलामयरासयात्रा ।
श्रीवैष्णवा यत्र मुदा मुकुन्दं राधावलीढं बहुधार्च्चयन्ति ॥
त्रिंशे दिने कार्त्तिकमासि सौरे श्रीकार्त्तिकेयस्य महासमर्चा ।
तस्मिन समारभ्य समग्रमग्र्यं मार्गं समर्च्चन्ति जनाश्च मित्रम् ॥
कात्यायनीव्रतारम्भस्तथा सर्वजयाव्रतम् ।
तस्मिन्नेव दिने चातुर्मास्यव्रतसमापनम् ॥
इत्थं विचित्रोत्सववृत्तजुष्टः कल्याणकृत सौख्यशतैः समृद्धः ।
शक्तिप्रियाणामपि वैष्णवानां जयत्यसौ कार्त्तिकसौरमासः ॥

मतिमञ्जरी

श्रीमन्तः पारिषदाः ! अपि नाम भवन्तः स्वेन सौन्दर्येण विज्ञानेन द्रविणेन बुद्धिलाघवेन धर्मानुगमेन नैष्ठिकाचारेण प्रवचनचातुर्येण कवित्वप्रकर्षेण गुणान्तरेण वा स्वात्मानं श्लाघन्ते ? यद्येवं कियन्तः सौन्दर्यवन्तो वा प्रौढविज्ञानशालिनो वा धनिका वा बुद्धिमन्तो वा धार्मिका वा नैष्ठिकाचारपरिपूता वा प्रवक्तारो वा कवयो वा गुणान्तरप्रशस्ता वा दृष्टाः श्रीमद्भिः, येन सर्वतः समुत्कर्षमात्मन्यवधारयतामयं वो बुद्धिव्यामोहः ? नहि सर्वः सर्वं जानीते । एकस्यापि शास्त्रस्य सर्वाणि तत्त्वानि यद्येकेन दुर्बोधानि तदा केयमात्मनि श्लाघा शास्त्रज्ञानवताम् । का कथा यद् भवन्तो जानन्ति तस्य तत्त्वस्य, भवतामविदितान्यपि तत्त्वानि किमु नालं विज्ञातु मन्यः । तत सोऽयं भवद्भ्यः प्रशस्ततर इत्यवश्यमभ्युपेयम् । सन्ति पुनरन्येऽपि तस्मादधिकाः केचित । एवमपरे समुत्कृष्टतरास्तेभ्य इत्येवमनवस्थापाते न कस्यापि युज्यते श्लाघा । एवमन्यत्रापि । अत एवोक्तं प्राच्यैः—

'उपर्युपरि पश्यन्तः सर्व एव दरिद्रति' इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञान-भक्ति-विवेकः

[निबन्धकः—श्रीगोविन्दविजयगोस्वामी बि ए]

विश्वस्य परमकारणं प्रकाशकश्च ब्रह्म, तदात्मकमेवैतन्न ततः पृथगित्येवं निश्चयफलो निगमादिसाधनैर्जायते यो विवेकस्तज्ज्ञानमिति। विश्वस्य कार्यस्य कारणमात्रात्मकत्वं कनककुण्डलादिदृष्टान्तेन दर्श्यते। जाग्रदादित्र्यवस्थं जगत्। एतद् येनानुगतं प्रकाशते, समाध्यादौ च यदस्ति कालत्रये अव्यभिचारि तत् सत्यं ब्रह्म। कारण-प्रकाशक-व्यतिरेकेण कार्यस्य प्रकाश्यस्य चानुपलम्भात् कार्यप्रकाश्ययोः कारण-प्रकाशकाभ्यामभेदः। एवं प्रपञ्चस्य ब्रह्माभेदः। ब्रह्म स्वतः सिद्धं न तु कार्यम्। ज्योतिश्च स्वप्रकाशम्। नानाभेदव्यवहारालम्बन—विश्वरूपेण चित्रं भाति। न तु ततः पृथग् विश्वम्। अविवेकहेतुको जीवानां संसारः। विवेकहेतुको मोक्षः। आत्मा तु निर्विकारः। मुक्तेः क्रियाफलत्वे भवेदेतावदात्मनो विकारः। तस्यास्त्वारोपिताज्ञानमात्रनिवृत्तिरूपत्वात् नात्मसंस्पर्शित्वं बन्धमोक्षयोः। अत आत्मनो न विकारः। परमकारणत्वेन सर्वानुस्यूतत्वेन अवशिष्यमाणत्वेन, सुषुप्ति-प्रलययोः प्रतिष्ठात्वेन, विश्वस्याधारत्वेन, निषेधावधिभूतत्वेन लक्ष्यमाणं ब्रह्म।

ज्ञानमार्गस्य चरमलक्ष्यं जिज्ञासया प्रपञ्चाध्यासमपोह्य विरजसो मनसो ब्रह्मणि निश्चलतया धारणा। ततो वृत्तिरूपतां परित्यज्य मनसो ब्रह्माकारेण परिणामात् साधकः शुद्धमात्मानमुपलभ्य निरुपाधिकमधिष्ठानं प्रकाशकं सर्वानुस्यूतं परिपूर्णमद्वयं ब्रह्म प्राप्नोति। ध्येयध्यातृविभागशून्यमेकमखण्डमात्मानमीक्षते। एषा ब्रह्मसिद्धिः।

एवम्भूतं ब्रह्म श्रुतयो बहुधा प्रतिपादयन्ति। ताभिरुत्पद्यमानमपि तज्ज्ञानं असम्भावना-विपरीतभावनातिरस्कृतत्वात् देहाद्युपाधिकृतान्तराणां कालवशेन मलिनचित्तानां परोक्षमिव भवतीति न भगवज्ज्ञानसामर्थ्यं नैवापरोक्षसंसारभ्रमनिवृत्तिसामर्थ्यम्। शब्दब्रह्मनिष्णातो विचार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोटिभिरपि भक्तिं विना परब्रह्मनिष्ठां न विन्दति। तथाहि श्रुतयः 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः। इति। यमेवैष वृणुते तेन लभ्य' इत्यादयः। स्मृतयश्च। क्लिश्यन्ति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते। नान्यद् यथा स्थूलतुषावघातिनां, न चान्य एकोऽपि चिरं विचिन्वन्निति, आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रय इति, संसारसिन्धुमतिदुस्तरमुत्तितीर्षो र्नान्यः प्लवो भगवतः पुरुषोत्तमस्य। लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद् विविधदुःखदवार्दितस्य। इत्यादयः। अलमतिविस्तरेण। अत एव भगवल्लीलाकथाशून्या वैदिक्यपि वाक् न श्रेयस्करी। भक्तिमिश्रं ज्ञानादिकमुपदिष्टम्।

अनिमित्तं निमित्तेन स्वधर्मेणामलात्मना।
तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरम्॥
ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा।
तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना॥

इत्यादिना श्रीकपिलदेवेन। ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः। इति। मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि। इत्यादिकमप्यनुसन्धेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीश्रीकालिका

[निबन्धकः—श्रीशशिमोहनतर्कशास्त्री]

श्यामे कालभियस्त्वमेव जगतां दुःखस्य नाशेऽपि च
शक्तातो वरदाभयेति सकलैरुक्ता सुरेन्द्रादिकैः ।
किन्त्वद्यापि भवाम्बुधौ निपतितानुन्मज्जतो मज्जतः
किं भीतानिह वीक्षसे त्रिनयने मातर्दशा नैकया ॥१॥
खड्गेन मुण्डेन च राजसी या
दिगम्बरा या तमसा शवेन ।
सत्त्वे वरञ्चाभयमादधाना त्रिभिः
समैः स्वेन कृता वरेण्या ॥२॥
या कृत्वा दन्तपंक्त्यन्तः कालं लेनहि लोपयेत् ।
सैव प्रलज्जिता देवी विदधे शेन शं स्वयम् ॥३॥
प्रसूते तु सदा विश्वं जगन्माता दिगम्बरा ।
कालसंकलनात् त्रातुं खड्गैर्मुण्डैर्भयङ्करी ॥४॥
वराभयकरा शान्ता पातुं पुत्रान् कृपामयी ।
दैत्यान् दारयितुं भीमा त्रिनेत्रा मुण्डमालिनी ॥५॥
यस्या विकटदंष्ट्राया आस्यमध्ये जगत्त्रयं ।
पादाघातान्महाकालः शिवोऽप्यशिवतां गतः ॥६॥
तां कालीं भक्तितो वन्दे भक्तकामदुघां शिवाम् ।
सर्वैश्वर्यमयीमम्बां वस्तुतश्चिन्मयीं सदा ॥७॥
मुण्डमालिनि माला ते च्छिन्ना किमु पुरातनी
अथाद्य तां महामालां वृहतीं कर्त्तुमिच्छसि ।
जानासि सर्वन्तु करोषि सर्वम्
इच्छामयि ज्ञानमयि क्रियामयि ॥८॥
सृजस्यशेषं हरसि प्रपासि ।
तत्त्वं प्रवक्तुं तव नैव शक्यते ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रासलीला

[निबन्धकः—श्रीनृत्यगोपालपञ्चतीर्थः]

रासकेलिकलया किल कृष्णो गोपिका रमयितुं निजकान्ताः ।
गोपराजभवने कृतवासः स्वप्रतिश्रुततया स इयेष ॥१॥
विस्मयोऽत्र नहि विश्वजनीनप्रेम्न आत्मरतिकस्य विधातुः ।
स्वानुरक्तजनमोहनवृत्तावीदृशी हि जगदीश्वरलीला ॥२॥
दातुमिच्छति सदैव सदेवः काम्यमर्थिन इति प्रथितन्तत ।
कामना तु सुलभा नहि तादृग् या बलाद्धरति दातृमनांसि ॥३॥
तत्र शारदनिशा कुसुमान्ता प्रेमसारदनिशाकरकान्ता ।
मल्लिकासुमनसां पवनोऽभूत् सौरभाकुलितगोपवनोऽपि ॥४॥
कालकर्म-सुकृतानि विधातुर्वाञ्छया प्रसुवते फलमिष्टम् ।
तच्च सर्वमुदितं खलु वीक्ष्य श्रीहरी रणितवान् मधुवेणुम् ॥५॥
यद्रवो द्रवमधाद् व्रजगोपीचेतसामपहृतान्यरतीनाम् ।
येन तेन निखिलः शिथिलोऽभूत् पत्यपत्यसुहृदां दृढ़बन्धः ॥६॥
भावना बलवती विषयाणां दुस्त्यजा पुनरसौ सुविमुग्धः ।
गोपिकाभिरबलाभिरियं सा सद्य औज्झ्यत महन्ननु चित्रम् ॥७॥
सा कृपा विजयतेऽत्र हरेर्वा या हरेदनुगतप्रतिबन्धान ।
द्वेष्यमेष्यमिह नास्ति तदीयं साधनोचितफलं स ददाति ॥८॥
प्रेम यच्च पतिपुत्रधनानां तत् पृथक् पृथगतोघनसारम् ।
सङ्कलय्य विपिनं ययुरेता यत्र सोऽखिलजगत्पतिरास्ते ॥९॥
काञ्चनाङ्कशयितान निजपुत्रान् धेनुदोहमपरा न समाप्तम् ।
पारणामभिमतां पुनरन्या व्याजतः प्रतिययुः परिहृत्य ॥१०॥
कापि कामपि न बोधयतीदं न प्रतीक्षितवती क्षणमन्याम् ।
न त्रपापरिचयो न च तासां न प्रसाधनविधेः परिपाटी ॥११॥
केवलं कथमहं हरिमेमि प्राक्प्रियं प्रियतमा हि तथा स्याम् ।
इत्थमात्मपरतामतिरासां न प्रियाः सहचरीरनुरुन्धे ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेरणा भगवतो हि यदा स्यात् का रतिर्नु परतः परतैव ।
यन्निरोधमपि काश्चन योगं मेनिरे विषयतो हृतचित्ताः ॥१३॥
वीक्ष्य ता उपगताः समवेताः काननान्तरथ घोरनिशीथे ।
ताः परीक्षितुमनाः कपटेन प्रेम गोपवनिता हरिरूचे ॥१४॥
स्वागतं व इह किं करणीयं धेनुकाष्ठकलनं क्षतकालम् ।
लोभते यदि मनो वनशोभां नाधुनापि किमु तच्चरितार्थम् ॥१५॥
यात तन्निजगृहं गृहपालो हन्त भोः कतिपथं विचिनोति ।
स्तन्यपानविरहाद् रहिता वः सूनवो नवमशर्म भजन्ति ॥१६॥
वेद्मि यन्नयि रतिर्भवतीनां सा किमु व्रजपतेस्तनयेऽथ ।
आत्मनोति न परे पुरुषेऽस्मिन् युज्यते मयि पतीन् परिहाय ॥१७॥
प्रीतये तनुभृतां परिचर्या सर्वजीवहृदये निवसामि ।
तन्निवर्त्य मम भौतिकसेवां ध्यानमाप्नुत परात्मन एव ॥१८॥
एवमादि कठिनं प्रियवक्त्राद् भाषणं समधिगत्य पुनस्ताः ।
ऊचुरात्ममननं प्रति कृष्णं विस्मिता द्विषमिवात्मवितृष्णम् ॥१९॥
सत्यमात्थ भगवन्नखिलात्मन् त्वं परः पुरुष एव न मिथ्या ।
धेनुकाष्ठमनसो हि वयं स्मो यच्चिरं वितनुमो जनसेवाम् ॥२०॥
एकतो यदि लभेमहि सर्वं किं चितैर्नु बहुभिर्गतसारैः ।
भर्तृपुत्रसुहृदामनुवृत्तिः क्लेश एव न सुखं पुरुषार्थः ॥२१॥
त्वं पतिः परिजनात्मजभोगा नित्यसौहृदगुरुर्लघुलभ्यः ।
तेन कण्ठमणिनीतिमधीत्य त्वां प्रयाम नच दूरमुपेमः ॥२२॥
यत्प्रियं प्रियतमाय निवेद्य प्रीतिमेति सकलः खलु जीवः ।
त्वत्परः प्रियतमो न न आस्ते सङ्गताः स्वमधुना वितरीतुम् ॥२३॥
यच्चिरं सुचरिता जनसेवा तेन तत्र विरता भगवन्तम् ।
प्राप्नुमोऽज ! क इहास्ति विमूढः साध्वसाधु विभजन् समुदास्ते ॥२४॥
वीक्ष्य तद्व्रजवधूमतिसारं श्रीपती रचितरासविहारम् ।
एत्य मण्डलगतो भुवि तासामाबभौ दिवि सतार इवेन्दुः ॥२५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानव-प्रजापतीयम्

(खण्डकाव्यम)

(पूर्वानुवृत्तम)

[निबन्धकः—श्रीरवीन्द्रकुमारसिद्धान्तशास्त्री]

इति निज-हृदये स ध्यातवान दीर्घकालम्
प्रतिकृति-रचनार्थं चेष्टमानस्ततोऽभूत् ।
बहु-मिलित-पदार्थैर्निर्मितं क्रव्यमस्याः
पिशितमपि तरुण्या लज्जितं यद्-विलोकात् ॥१२५॥

अपि च नरवरोऽसौ देहमस्या विधातुं
रचित-दृढ-पदार्थैर्निर्ममे चास्थिपङ्क्तिम् ।
विकृत-बहु-पदार्थैस्तत्र सञ्जाश्च कृत्वा
बहु-पशु-धमनीभिस्तत्रनाड़ीः प्रचक्रे ॥१२६॥

निपुणकृत-निवेशो निर्ममे चान्त्रराशिं
सुकपि-युवति-देहाद् यत्नपूर्वं गृहीत्वा ।
रुधिरमपि स कृत्वा रञ्जितैर्मद्यसङ्घैः
सकल-विध-पदार्थान स्थानसंस्थानकार्षीत ॥१२७॥

पदयुग-नखसङ्घश्चन्द्रबिम्बानुकारी
चरणरचनमस्यास्तर्पकं नेत्रपङ्क्तेः ।
अपि च पदयुगाग्रे कोरकाश्चम्पकानां
निलयमिह हि चक्रुर्व्याजमाप्त्वाङ्गुलीनाम् ॥१२८॥

सुरुचि-रचित-जङ्घा मानव-प्रीति-हेतु-
विगत-धमनि-दृश्यं जानुयुग्मं सुरम्यम ।
हत-करि-कर-शोभम् मांसलं स्वर्णवर्णं
रचितमुचितयत्नादूरुयुग्मञ्च रम्यम ॥१२९॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाताराजकीयसंस्कृतमहाविद्यालयस्य सपादशताब्दीपरिपूर्त्ति-
महोत्सवे पण्डितसम्मेलनाध्यक्षाणां महामहोपाध्याय-
श्रीचण्डीदासन्यायतर्कतीर्थानाम्

अभिभाषणम्

(पूर्वानुवृत्तम्)

सैषा संस्कृतभाषा, या सर्वेषां भारतीयानाम् अद्वितीयं मेलनसूत्रम्। आकाराचारादिभिर्वेशभूषणादिभिर्नानाप्रदेशसम्बन्धाच्च बहुधा भिद्यमाना भारतीया इदानीमपि यदैक्यमनुभवन्ति, तस्य मूलमेषा संस्कृतभाषा। आ सेतोरा च हिमपर्वताद् यद् वयमखण्डतामनुभवामः, सर्वेषु तीर्थस्थानेषु पुण्यासु नदीपर्वतारण्यभूमिषु यद् वयं ममत्वाभिमानमुद्वहामस्तस्यापि मूलमेषा संस्कृतभाषा। अस्मदुपेक्षया यदि सैषा भाषा त्रुट्येत, तर्हि सर्वा भारतीया संहतिरेकपद एव विच्छिन्ना भवेत्। सर्वासां संहतीनां विच्छेदे वयमपि वा जीवन्तोऽपि किं कुर्मः। संस्कृतभाषाया उच्छेदे उच्छेदः स्यात् कृत्स्नस्य भारतवर्षस्य। कापि भारतीया संस्कृतिस्तदा न स्थास्यति, "वयं भारतीयाः" इत्यपि कथयितुं तदा न प्रभविष्यामः।

प्रादेशिकभाषास्विदानीमत्यादरो दृश्यते। तत्तत्प्रदेशवासिजनानां प्रादेशिकभाषायामादरस्तु स्यात्, किन्तु अत्यादरेण भारतस्य मूलच्छेदो न क्रियतामित्येव साञ्जलिबन्धं निवेदयामः। सर्वासां प्रादेशिकभाषाणाम् इयमेव संस्कृतभाषा साक्षात् परस्परया वा मूलमित्यत्र नास्ति सन्देहावसरः।

का नाम भाषा भारतस्य राष्ट्रीयभाषा भवितुमर्हतीति विवेचयन्ति इदानीं बहुश्रुता विद्वांसः। मम तु प्रतिभाति,—सैव भारतवर्षस्य राष्ट्रीयभाषा भवितुमर्हति, या साकल्येन भारतीयां संस्कृतिमुद्वहति, भारतीयां सर्वां संस्कृतिं क्रोडीकुर्वाणा संस्कृतभाषैवेका विराजते। अन्या संस्कृतिर्दूरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिष्ठतु, यदि वयम् अस्माकं पितृपितामहादीनां नामान्यपि स्मरामस्तदैव ज्ञातुं प्रभवामः, का नाम भाषा तदानीमस्मच्चेतसि परिस्फुरेत्। अस्मत्-पितृपितामहादीनां नामानि सर्वाण्येव संस्कृतवाङ्मयानि। नहि कश्चित् संस्कृतभाषां सर्वथैवाजानन् तेषां नाम्नामर्थं बोद्धुं प्रभवेत्।

को हि नाम तादृशो जनः, यः खलु गीताश्लोकं रामायणादीनां श्लोकं वा श्रुत्वा हर्षातिरेकं नानुभवति। अद्यत्वे सभादिषु वेदमन्त्रैः पुराणादि-श्लोकैर्वा मङ्गलाचरणमनुष्ठीयते, अत्रापि सभ्यानां कश्चन उल्लासातिशयो भवति, अन्यथा प्रादेशिकभाषया किमिति मङ्गलाचरणं नानुष्ठीयेत? प्रच्छन्नतयाऽपि श्रद्धातिशयः संस्कृतभाषायामेव सभ्यानाम्। भारते जन्मग्रहणमात्रेणैव जनहृदये संस्कृतभाषायां श्रद्धा प्रकटतयाप्रकटतया वा तिष्ठत्येव।

अस्ति सर्वातिशायिमाहात्म्यमस्याः संस्कृतभाषायाः, यत्प्रसादात् प्रदेशभेदभिन्नानामपि जनानां एकगृहस्थितानां सोदराणामिव परस्परं ममत्वाभिमानो भवति, कथमन्यथा रामसेतौ प्रतिघाते जाते तीव्रमुद्वेग-मनुभवन्ति हिमपर्वते विशालाक्षेत्रनिवासिनो जनाः? येयं ममत्वानुभूतिः केवलमेकया संस्कृतभाषया भारतीयानां चेतसि व्यवस्थाप्यते, सा भाषा यद्युच्छिद्येत, नान्यत् किमपि भारतीयानामेवं ममत्वानुभूतिसाधनं केनाऽपि कथमपि उद्भावयितुं शक्यम्। स्वार्थेऽपि मात्सर्यं चेत् स्वकीयगृहदाहेऽपि उल्लासश्चेत् स्वशिरश्छेदेऽपि दुराग्रहश्चेदुच्छिद्यतां तर्हि संस्कृतभाषा।

न कस्याश्चिदपि प्रादेशिकभाषाया एवं सामर्थ्यं सम्भाव्यते, यन्नाना-प्रदेशवासिनो भारतीयान् नानावेशभाषादिभिर्भिद्यमानान् सुदृढेन ममत्व-सूत्रेण बन्धुं शक्नुयात्। वेदरामायणमहाभारतादिग्रन्थाः सर्वैर्भारतीयै-स्तुल्यदृष्ट्या ममत्वबुद्ध्या आद्रियन्ते, नात्र प्रादेशिकताया गन्धोऽपि। रामायणादीनां ये प्रणेतारस्तेऽपि प्रादेशिकतादोषैर्न दूष्यन्ते, कोहि नाम स्वस्थचेता वाल्मीकिं व्यासं वा तयोर्निवासप्रदेशसम्बन्धेन निर्देष्टुं शक्नुयात्? कृत्स्नस्य भारतस्यैवैतौ परमबान्धवौ। संस्कृतभाषाया एतन्माहात्म्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये एतया भाषया ग्रन्थान् प्रणयन्ति तेऽपि प्रादेशिकतापातकग्रासाद् विमुक्ता निर्मले भारतीयगगने विराजन्ते। अर्वाचीना अपि रघुनाथमथुरानाथ-जगदीशगदाधरप्रभृतयो वङ्गदेशनिवासिनोऽपि कृतस्ने भरतखण्डे अद्याऽपि देववत् पूज्यन्ते, सर्वे भारतीया "ममैवैते" इति सुदृढमभिमानमुद्वहन्ति।

यदि प्रादेशिकभाषां विहाय संस्कृतभाषा राष्ट्रीयभाषात्वेन गृह्येत, सद्यः समुच्छिद्येत तर्हि यत्नसञ्चितः प्रादेशिकतामादाय विवादः। विद्वद्-वरेण्याः! मम प्रतिभानानुरूपं किञ्चिद् भवतां पुरत उपस्थापितं मया, यद्यत्र किञ्चित् सौष्ठवं स्यात, तदसौष्ठवांशं परित्यज्य ग्रहीतव्यमिति सविनयमावेदयता विरम्यते।

वृत्तवर्तिका

श्रीमन्तः पारिषदाः! नूनं नाविदितमिदं युष्माकं यत पश्चिमवङ्ग-राष्ट्रीयसंस्कृतशिक्षापरिषदः १६५० खृष्टाब्दीयसंस्कृतपरीक्षा तत-खृष्टाब्दीयस्य एप्रिलमासस्य षोड़शदिवसादारभ्य प्रवर्त्तिष्यत इति परिषत्-परिवृढ़ैः पत्रिकाद्वारेण विघोषितमस्ति।

सेयं विघोषणा सुतरामस्माकं विस्मयाय परिकल्पते। प्रतिवर्षं रविवारमपहायैव परीक्षादिनानि निरूप्यन्ते। तत निरुक्ते एप्रिलमासस्य षोड़शदिवसे रविवासरे कथं नाम परीक्षाव्यापारः समारभ्येत। तत् किमिदं भारतवर्षस्य नातिचिरमुपगतायाः स्वतन्त्रतायाः प्रथमविजृम्भितम्, फलं वा परिषत्परिवृढ़ानां महतः प्रमादस्येति स्पष्टं नातिचिरेण वयं विज्ञातुमिच्छामः। आद्ये नास्ति वचनीयम्। द्वितीयश्चेदचिरेण पुन-रप्रमादनिरूपितं परीक्षादिनमाघोषणीयं संस्कृतशिक्षापरिषदेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishat Series

(Revised up to April, 1949)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhanta-bhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshina-charan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kali-pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina-charan Bhattacharya. Rs. 2-8 ; Rs. 2 (for members).

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish-chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14 ; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamaho-padhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarka-charya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarka-charya. Rs. 4 ; Rs. 3. (for members).

16. **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof. Akshayakumar Shastri. Re. 2-8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M.A. Rs. 7-8 ; Rs. 6 (for members). Almost out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 17, R. G. Kar Road, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXII. December 1949

No. 8. १८७१-शकीये

३२श-वर्षस्य अग्रहायणे

८म-संख्या मासे

भारते मातृ भारती

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता ।

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—14s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः, प्राप्तकालं किञ्चिद् विज्ञाप्यते युष्मासु, तद् यदि सादरमिदमाकर्ण्यत, तदैवास्य साफल्यं मंस्यामहे।

अपि नाम परिषदः प्रेमभूमयो भवन्तो ननु! तत कथं समुपहन्यमाना-मप्यकाण्डे दुरवस्थाराक्षस्याहंपूर्विकया परिषदमिमां प्रेयसीं नोत्सहध्वे जीवयितुम्? जानन्त्येव भवन्तो यत परिषदियं कियतः कालात प्रागात्म प्रतिष्ठायै कलिकातापौरसभादत्तं किञ्चित स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूत-दौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति।

सेयं सम्प्रति असमाप्तं तत समाप्तं कर्त्तुकामा पुनरप्यर्थाभावेन मनो-गतं कृत्यमनुष्ठातुं न शक्नोतीति अहो निन्दा, अहो त्रपा, अहो न्यक्कारः संस्कृतविद्यावतां सर्वेषां परिषतप्रणयिनाम्। तदावेद्यते परिषतप्रेयःसु युष्मासु यत, प्रियतमामिमां परिषदं चेत प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छथ, तदा सदयं प्रेषयत यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषतप्रणयिन्याः प्रासादनिर्माणमधिकृत्येति।

सङ्केतः—संस्कृत-साहित्य-परिषत्-
सम्पादकः, श्यामवाजार
कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXII. No. 8. | १८७१-शकीये अग्रहायणे ३२श-वर्षस्य ८म-संख्या | December 1949.

संस्कृतसाहित्यपरिषत्

श्रौतसूक्तिः

जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्वस्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानोऽ
न्येषामस्तमुप नक्तमेति ।

———

तदनुवर्त्तिनी

लौकिकसूक्तिः

अक्षैर्जितो यावदुपैति दूरं
जाया च माता च तदा प्रतप्ते ।
ऋणी स बिभ्यद्धनमाप्तुकामः
स्तेयेन रात्रौ परगेहमेति ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मासवार्त्तिकम्

मार्गशीर्ष सिता षष्ठी गुहषष्ठीति संज्ञिता ।
सप्तमी या तिथिः शुक्ला सा ख्याता मित्रसप्तमी ॥
अहःसु सर्वेषु हि मार्गशीर्षे समर्च्यते यद्यपि मित्रदेवः ।
तथापि तत्रैव तिथौ विशेषः पूजाविधेस्तस्य विभाकरस्य ॥
मार्गान्तिमाहे किल मित्रपूजां मासायतां निष्ठिकया समाप्य ।
घटं शरावञ्च विसर्जयन्ति सूर्यस्य भक्ता महतोत्सवेन ॥
ततश्च पाषाणचतुर्दशी तिथिस्तस्यां हि पाषाणचतुर्दशीव्रतम् ।
पाषाणतुल्याकृतिपिष्टकैर्यतो गौरीसमर्चा निशि साध्यते नरैः ॥

कात्यायनीव्रतसमापनमुत्तरस्यां
गोस्वामिनामभिमतं खलु पौर्णमास्याम् ।
स्नानेन यत्र विहितेन निशाद्यभागे
दानेन चोद्भवति पुण्यमशेषकास्यम् ॥

कात्यायनीव्रतसमाप्तिरथापरेषा-
मन्त्ये दिने विधिमता शुभमार्गशीर्षे ।
स्वं सम्प्रदायमनुसृत्य जना विभिन्ना
कात्यायनीव्रतमतः सुसमापयन्ति ॥

श्रीरामकृष्णपरहंसगृहीतशक्तिः
श्रीसारदा तनुभृतामभिवन्दनीया ।
या सप्तमी तिथिरतस्तिमिरस्य पक्षे
तस्यां भवोपकृतये प्रदधार कायम् ॥

सूर्यस्य कीटाद् धनुषि प्रयाणं सम्पद्यते गोष्पतिपुण्यवारे ।
लक्ष्मीं ततः केचन पूजयन्ति शरीरिणो देशविशेषसंस्थाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतिमञ्जरी

मासोऽयमग्रहायण इत्याख्यायते। तत् कुतः खल्वेनन्? अपि नाम हायने सर्वतः पूर्वपातित्वादियं संज्ञा? यद्येवं, तदा तमेतमारभ्य युक्तं मास-संख्यानम्। तच्च नास्ति, सर्वत्र वैशाखमारभ्यैव मासगणनायाः प्रचर-द्रूपत्वात्। ऋतुगणनायामपि 'द्वौ द्वौ माघादिमासौ स्यादृतु'रित्यादिना अमरकोषादिषु माघमारभ्य मासगणनायाः प्रक्रान्तत्वात्।

अत्र केचिदाहुः—आसीत् तादृशः समयो यदा मार्गशीर्षमारभ्यैव वर्षघट-कानां मासानां क्रमो गृहीतः। कालेन ज्योतिषशास्त्रोक्तमेषादिराशिक्रमे सर्वतः प्रथमं मेषराशेः परिग्रहेण भास्करस्य तद्राशिसंक्रान्तिमतो वैशाखस्यापि प्रथमतः संख्यानमिति।

अन्ये पुनराहुः—मार्गशीर्षे मासि गृहीतजन्मा तीर्थाभिलाषी परोप-कारी सत्प्रकृतिः सद्व्यवसायश्च सम्पद्यते। तथा मासेऽस्मिन् वसुन्धरायाः प्रभूतशस्यादिसमृद्धतया महानुत्कर्षः पदं दधाति। तत एव मासान्त-रेभ्यः सिद्धो मार्गशीर्षस्य प्रकर्ष इति प्रकृष्टार्थकेनाग्रपदेन प्रवृत्ता मासस्यास्य ध्रुवमग्रहायणसंज्ञा।

वयन्तु ब्रूमः—गृहपतयो ह्यस्मिन्नेव मासे संवत्सरं यावद् भोग्यानि धान्यानि गृहे यथासम्भवं सञ्चिन्वन्ति। सञ्चित्य चैषां व्ययं कुर्वाणा एको द्वावित्यादिरूपेण मासगणनां कुर्वन्ति। तत्र च गणनायामयमेव मासः प्रथमं निपततीत्यस्याग्रहायणसंज्ञा सोपपत्तिका भवति। कृषीवलाः सर्वं संवत्सरं परिश्रमेण यत् फलमुद्दिशन्ति, तस्याप्ययमेव लाभकाल इति हायने अस्यैव परमप्रमोदास्पदत्वात् सर्वतः प्राग्रसरत्वमिति युक्तैव सा संज्ञा। अस्मिन् मासे शस्यसमृद्धतया वसुमत्या ह्रासमुपैति शस्यमूल्यं, प्रवर्द्धते च कौक्षो वैश्वानर इत्यनुकूला स्थितिर्गृहपतीनाम्। स्थविरास्तु मासस्यास्य प्राथमिकान्यष्टौ दिनानि यमस्य दशनभूतानि मन्यमाना भीत-भीताः कालं क्षपयन्ति, बह्वाहारं परिहरन्ति, लघ्वाहारञ्च परिगृह्णन्ति। तदयम् 'एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः'। इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मसूत्र-मितभाष्यम्

[निबन्धकः—श्रीचारुकृष्णदर्शनाचार्यः]

(पूर्वानुवृत्तम्)

वैदिकी चाविद्या कर्मैव ज्ञेया। विद्या ज्ञानं तद्भिन्नत्वात् कर्मैव अविद्या, श्रुतौ द्वयोरेव साधनत्वाभिधानात्, कर्मत्वाविशेषाच्च। पाप्मापि अविद्यैव, तथाहि—

तत्त्वज्ञानं मता विद्या तदन्यत् कर्म वैदिकी।
अविद्या सम्मता सत्या नानिर्वाच्या गुणात्मिका॥
विद्यया तदपायेन बन्धाभावाद् विमुच्यते॥ इति

तथाच श्रुतिः "विद्यां चाविद्यां च यस्तद् वेदोभयं स ह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥" इति

अयमर्थः—यो जनो विद्यातत्त्वम् अविद्यातत्त्वं च तदुभयं वेद विद्याया मोक्षसाधनत्वम् अविद्यायाश्च केवलकर्मणस्तपोरूपस्य पापक्षय-साधनत्वं सम्यग् जानाति, स ह स एवेत्यर्थः, न तु साहित्यवाचकः सहशब्दः यत्तदोर्नित्यसम्बन्धात् ततपदाध्याहारे च गौरवात्, अविद्यया कर्मणा मृत्युं निखिलदुःखहेतुं पापं तीर्त्वा विधूय विद्यया ज्ञानेन अमृतं मोक्षम् अश्नुते लभते। मनुश्चैनमर्थमनुस्मरति—

"तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते॥"॥ इति

तपः स्वाश्रमोचितं कर्म 'तपः स्वधर्मवृत्तित्वमि'ति महाभारतात्। विद्या ब्रह्मज्ञानं च द्वे एव ब्राह्मणस्य उत्तमं मोक्षसाधनं, कथं च तत्राह तपसा पुण्येन कर्मणा किल्विषं पापं हन्ति, विद्यया ज्ञानेन च अमृतं मोक्षं लभते इत्यर्थः। भगवताप्युक्तं "यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्" इति। शान्तिपर्वणि च "ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मण" इति। अत्र वेदार्थोपनिबन्धकेन मनुना अविद्ययेति तपसा मृत्युमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किल्विषं, तीर्त्वेति च क्त्वाप्रत्ययाविवक्षया हन्तीति प्रयुक्तम्, तथाच कर्मत्वाविद्येति स्फुटितं। चतुर्थश्च पादः श्रौत एवोद्धृतः सुगमत्वात्। उक्तं च मायावादिभिः "येऽविद्यामुपासते" इत्यत्र "विद्याया अन्या अविद्या तां कर्म इत्यर्थः। तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते" इति, तथा "प्लवा ह्येते अदृढा यज्ञरूपाः" तथा "इष्टापूर्त्तं मन्यमाना वरिष्ठम्" इत्याद्यन्तयोः कर्मनिन्दादर्शनात् अन्तरा "अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमाना जङ्घन्यमानाः परियन्ति मूढाः", "अविद्यायां बहुधा वर्त्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः" इत्यपि कर्मनिन्दापरमेव ज्ञेयम्। तथाच अविद्यापदेन कर्मैव परामृष्टं श्रुतौ। तथाहि अविद्यायामन्तरे कर्ममार्गमध्ये वर्तमानाः स्वयं धीराः कर्मतत्त्वाद्यभिज्ञाः कर्मकुशला अत एव पण्डितंमन्यमाना जंघन्यमानाः पुनः पुनरत्यर्थं पशून् घ्नन्तो मूढा अविवेकिनः अन्धनीयमानान्धवत् परियन्ति संसाराध्वनि यातायातं कुर्वन्ति इत्यर्थः। तथा अविद्यायां बहुधा वर्त्तमानाः कर्मबहुल एव मार्गे स्थिता दर्शपूर्णमासचातुर्मास्याग्निहोत्रादिविपुलकर्मकलापानुष्ठानात् कृतार्थम्मन्यमाना भवन्ति, ते बालवत् मूढा एवेत्यर्थः। यदा लेलायतेऽर्चिरित्यादिना कर्मण एव प्रकरणात् अप्रकरणाच्च अनिर्वाच्याविद्याया बौद्धोच्छिष्टाया, अन्यथा पशुवत् अज्ञानान्धकारमग्नत्वे धीराः पण्डितंमन्यमाना इत्यनुपपन्नं स्यात्, तस्मादत्राविद्यापदेन श्रुत्या कर्मैव प्रतिपादितं ज्ञेयम्। विद्यया विरोधिन्या कर्मरूपाया अविद्याया विनाशश्च श्रुतावुक्तः "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"। इति—

ब्रह्मणि दृष्टे सति तया विद्यया अविद्या नश्यतीति वक्तव्ये क्षीयन्ते चास्य कर्माणीति वदन्ती श्रुतिः कर्मणामविद्यात्वं गमयति। उक्तं च भगवता—

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथे"ति

अत्र च कर्म पुण्यपापात्मकमेव ज्ञेयं, न तु जगद्रूपं कार्यं बौद्धाभिमतं, "तदा विद्वान् पुण्यपापे विधूय" "सुकृतदुष्कृते विधुनुते" इति श्रुत्यन्तरात्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेन जगद्रूपं कार्यमिति व्याख्यानं ज्ञेयम्। विष्णुपुराणं च कर्मणोऽविद्यात्वमाह—

"अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते" इति कर्माख्या अविद्या पूर्वोक्ताभ्यां भिन्ना विष्णोस्तृतीया शक्तिः कथ्यते इत्यर्थः। बृहदारण्यके स्वाप्नश्रुतिरपि अविद्यायाः कर्मत्वमाह, "यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यते" इति अविद्यया कर्मणा, तदापि कर्मवशादेव सुखदुःखमय स्वप्नदर्शनात्।

तदिदं सुष्ठूक्तं न्यायाचार्यैः—

"इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो।
मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता" ॥ इति

एतेनाविद्या माया तमो मोह इत्यादयः पर्याया इति निरस्तं, श्रुतौ मायाशब्दस्य प्रज्ञावाचित्वाच्च। योगास्तु भ्रमस्याविद्यात्वमाहुः—"अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति "एवमविद्या न प्रमाणं न प्रमाणाभावः किन्तु विद्याविपरीतं ज्ञानान्तरमविद्येति" तद्व्याख्यातारः, विष्णुपुराणे च—

"अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः।
साऽविद्या तरुसम्भूते बीजमेतद्द्विधा स्थितम्॥" ॥ इति दिक्।

केचित्तु अविद्या नाम अज्ञानं भावरूपं भ्रमोपादानम् अनादिसिद्धं तमोनिभं यत्किञ्चित्, 'अहमज्ञः' "मामन्यं च न जानामि" इति प्रत्यक्षं प्रमाणम् इति, तन्न, तादृशप्रत्यक्षे ज्ञानाभाव एव भासते न तमोनिभमज्ञानं, मैत्रं न जानामीति प्रतीतौ गृहध्वान्तवत् मैत्रविषयं तमोविशेषमज्ञानं पश्यामीत्यननुभवात्, किन्तु मैत्रे ज्ञाते मैत्रज्ञानवानहमित्युपलभ्येत, नचोपलभ्यते इति मयि मैत्रज्ञानं नास्तीत्येव भासते, न च मयि ज्ञानं नास्तीति प्रतिपत्तौ आत्मनि धर्मिणि प्रतियोगिनि चार्थे अवगते तत्र ज्ञानसद्भावात्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानव-प्रजापतीयम्

(खण्डकाव्यम्)

(पूर्वानुवृत्तम्)

[निबन्धकः—श्रीरवीन्द्रकुमारसिद्धान्तशास्त्री]

कनक-सदृश-वर्णौ प्रेक्ष्य तस्या नितम्बौ
पिशित-पृथुल-कायौ सम्बरारेर्निकेतौ ।
चिरसमय-तपस्वी व्याहताक्षो मनस्वी
भवति विहतचेताः का कथा क्षुद्रयूनाम् ॥१३०॥

निकषित-कनकाभैर्निर्मितं रम्यमांसै-
र्मनसिज-शर-वासं मध्यदेशं मनोज्ञम् ।
नयन-युगल-पान्थं स्तोककालाय कृत्वा
भवति विगत-पुंस्त्वो मानवः कामदूतः ॥१३१॥

सुघटित इव हेम्ना नाभितो निम्नभागः
कनक-विरचिताभौ पार्श्वदेशौ प्रमृष्टौ ।
अतिशय-तनुताया मध्यदेशस्य सत्त्वा-
दपि तदिह न वेत्थं संशयः स्यान्नराणाम् ॥१३२॥

किमपि किमपि निम्नो नाभिदेशः सुरम्यः
कनक-रचित-विल्व-प्रख्यवक्षोज-युग्मम् ।
समुदय-तनुभागः कान्तिराशेर्निकेतं
कथमपि न कुहापि प्रेक्ष्यते चास्थिपङ्क्तिः ॥१३३॥

सुरचित-करजानां दर्शनं लभ्यते चेत्
शशधरमपि नैव द्रष्टुमिच्छेद् विदग्धः ।
कनक-विरचिताभाः प्रेक्ष्य हस्ताङ्गुलीश्च
क्षपित-सकल-चिन्तो नैव लिप्सेत चम्पाम् ॥१३४॥

जित-करि-कर-शोभं बाहुयुग्मं सुकान्तं
रचितमिव सुवर्णैर्वह्निपूतैः सुवर्णम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु करिकरवर्णो दृश्यते गाढ़कृष्णः
कथमिह समता स्यात् काञ्चनानामलातैः ॥१३५॥
अवनमित इवास्याः स्कन्धदेशः क्रमेण
क्षत-समुदय-दोषा कान्तरूपा शिरोधिः ।
न खलु न खलु काचिद् दृश्यते तत्र नाडी
न हि शशधरमध्ये जायते वह्निपिण्डः ॥१३६॥
वदनमतिमनोज्ञं दृश्यते येन तस्या
अनुभवति स लोके नाब्जशोभां सुरम्याम् ।
सुरनृपतिनिकेते संस्थिता वारनार्यो
युवतिमुखविलोकादात्महत्यामभीपुः ॥१३७॥
सुरुचिर-हनुकान्तिं प्रेक्ष्य तस्यास्तदानी-
मपमितिकृतभीतेरेणका मेनकाभूत् ।
अधर-विहित-कान्तेर्दर्शनाच्चैव भीता
रिपुवश-विवशाभूदुर्व्वशी सर्व्ववश्या ॥१३८॥
विगत-सकल-हर्षा नासिका-दृष्टि-मात्रं
हृत-मुनिजन-चित्ता स्वर्गवेश्या घृताची ।
अपि च मदनकेतुं गण्डयुग्मं विलोक्य
क्षयित-सकलभावा तत्र रम्भा प्रजाता ॥१३९॥
सुरुचिर-दशनानां दर्शनं प्राप्य लोके
कृत-पशुपति-वाहा शङ्करी प्राप शङ्काम् ।
अपि मनुज-कृतेयं मानवी रत्नमुख्या
मम हृत-रद-शोभा मां विमानां विदध्यात् ॥१४०॥
नयन-युगलमस्या मानहार्य्युत्पलानां
दिनकर-कर राशेस्तेजसा शक्तियुक्तम् ।
अपि च विपुलकायं दुःखहेतुर्मृगीणां
युवजन-हृदयानां केवलानन्दहेतुः ॥१४१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नयन-मणि-विलोकाद् रत्नमूर्त्तस्तु तस्याः
सितदृषदि विलीनः स्मर्य्यते नीलकान्तः।
अपि च नयन-लोम्नां निर्म्मितौ यत्नपूर्व्वं
मृगकुल-नयनेभ्यः पक्ष्मपंक्तिगृ हीता ॥१४२॥
चमरयुवति-पुच्छात् केशराशिं गृहीत्वा
बहु-तरल-पदार्थैर्मिश्रयन् स्नेहयुक्तैः।
चिकुररचन-काले मस्तके स्थापयित्वा
निज-सुनिपुणकार्य्यैर्ज्जातवान् दम्भयुक्तः ॥१४३॥
श्रवण-युगल-शोभा शक्यते नैव वक्तुं
न च समुदितगात्रे वर्णनीया त्वगाभा।
अपि च सकलदेहे लोमराशिर्यथाभू-
त्तदपि विहितविद्यः को हि वक्तुं समर्थः ? ॥१४४॥

(क्रमशः)

छन्दोगक्रियासारः

[पूर्वानुवृत्तम्]

स्रवन्तु नः" इति मन्त्रावृत्त्या जलमासिञ्चेत। १६। ततो दैवे ॐ यवोऽसि यवयास्मद् द्वेषो यवयाराती' रित्यनेन एकैकस्मिन यवानावपेत।

"यज्ञियवृक्षश्रमसेषु पवित्रान्तर्हितेषु" ॥७ इति श्राद्धसूत्रम्।

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।

प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" ॥ इति छन्दोग-परिशिष्टोक्तलक्षणैः पवित्रैरन्तर्हितेषु व्यवहितेषु इत्यर्थः। उक्तलक्षणानि पवित्राणि अन्तर्मध्ये हितानि निहितानि वा येषां तेषु इति वा। पवित्रे स्थ इत्यादिमन्त्रे द्विवचनोपन्यासाद् दललक्षणैव स्यादिति।

१६। "एकैकस्मिन्नप आसिञ्चति शन्नो देवीरिति"। इति। ४। श्राद्धसूत्रम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१७। षट्सु पित्रादिपात्रेषु प्रत्येकं ॐ तिलोऽसि सोम देवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहा' इति मन्त्रावृत्त्या तिलानावपेत्। १८।

ततो जलं स्पृशेत्। दैवादिक्रमेण अर्घ्यपात्रेषु तूष्णीं गन्धादिकं (*) दत्त्वा ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरीक्षा उत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शंस्योनाः सुहवा भवन्तु इत्युच्चार्य ॐ पुरुरवोमाद्रवःसंज्ञका विश्वे देवा एतत्तेऽर्घ्यं स्वाहा' इत्युत सृज्य दैवब्राह्मणहस्ते प्रागग्रं पवित्रं दत्त्वा पश्चाज्जलादिकं प्रतिपादयेत्। १९।

ततः पित्र्ये ॐ या दिव्या आपः...इति मन्त्रमुच्चार्य ॐ अमुकगोत्र

१७। "एकैकस्मिन्नेव इति ६म श्राद्धसूत्रं पूर्वं दर्शितम्।

१८। "पितॄनेकैकस्मिन्नेव तिलानावपति तिलोऽसि सोमदेवत्यो गोसवो-देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहेति" एकैकस्मिन्निति वीप्सादर्शनात् प्रतिपात्रं मन्त्रावृत्तिरुक्ता। १० इति श्राद्धसूत्रम्।

* पित्र्यमन्त्रानुहरणे आत्मालम्भे अवेक्षणे। अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे। मार्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे। निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत्।

* अर्घ्यपात्रेषु पुष्पादिप्रदानमर्थायातमिति कृत्वा तत्रभवता सूत्रकारेण न सूत्रितम्।

१९। "या दिव्या आपः पयसा संबभूवुर्या अन्तरीक्षा उत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः संश्योनाः सुहवा भवन्तु असावेतत्तेऽर्घ्यं ये चात्र त्वामनु याॅश्च त्वमनु तस्मै ते स्वधेति। १५। श्राद्धसूत्रम्।

दैवे विशेषानभिधानात् पितृरीत्येव यावत्सम्भवमुत्सर्गवाक्यं रचयितव्यम्। किन्त्वत्रासमवेतत्वात् 'ये चात्र त्वामनु' इति मन्त्रो न प्रयोक्तव्यः।

'स्वधा वै पितॄणामन्न'मित्यादिवचनाद् दैवे च स्वधावचननिषेधात् स्वधापदयुक्तमन्त्रो दैवे न समवैति। दैवे स्वधाकारनिषेधस्तु छन्दोगपरिशिष्टे उक्तः। तथाच—"स्वाहाकारवषट्कारनमस्कारा दिवौकसाम्। स्वधाकारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितरमुकदेवशर्मन्नेतत्तेऽर्घ्यं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा" इत्युत्सृज्य पितृब्राह्मणहस्ते उत्तराग्रं पवित्रं दत्त्वा पश्चात् जलादिकं तूष्णीं प्रतिपादयेत । २० ।

(क्रमशः)

पितॄणान्तु हन्तकारो नृणां मतः' । इति विकृतावेवोहस्य नियमात् स्वधा-पदस्थाने स्वाहापदोहोऽप्यत्र न सम्भवति । अपिच "सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते । सर्वेष्वंशहरा माता इति धर्मेषु निश्चयः" । इति छन्दोगपरिशिष्टवचनात् यथा पितॄननुयन्ति भोक्तारस्तथा देवाननु केऽपि न भुञ्जते । ततः सर्वथायं मन्त्रो दैवे न समवैति । अर्थाभिधानसामर्थ्यादेव मन्त्राणामङ्गभावः । तथा चोक्तं "अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यादिति" अतो यावत् शक्यं पितृदृष्टं कर्त्तव्यम् ।

२० । "एकैकस्यैकैकेन ददाति सपवित्रेषु हस्तेषु" । १५ इति श्राद्धसूत्रम् ।

श्रीश्रीराधा

[निबन्धकः—श्रीशशिमोहनतर्कशास्त्री]

राकानिशीथे रतिमाप्तुकामा धात्री त्वमेका कमनीयदेहा ।
रमापतिं तं मुररोधरं सा गोलोकपुर्यां रहसि श्रितासि ॥१॥
सा राधातीर्थवर्या भवति च सततं ध्यानगम्या मुनीनां
या विष्णोर्मानसी स्यात् सकलरसमयी सर्वसंपत्स्वरूपा ।
दोर्भ्यां धृत्वा मुरारिं परित इह न किं शोभते काञ्चनाभा
विद्युन्मालेव मेघे मुरहररसिका कान्तिदा कृष्णदेहे ॥२॥
कृष्णः कल्पतरुः कल्पलतिका सैव राधिका ।
अनयोरेकदृष्टान्त उमया सह शङ्करः ॥३॥
रासेश्वरी तु मुख्या सा धात्री त्रिजगतां परा ।
गोलोके राजते यासौ धाम्नि वृन्दावने सदा ॥४॥
राजराजेश्वरी यासौ धात्री त्रिलोकतारिणी ।
रामस्य जानकी वामे धातुर्वामे सरस्वती ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तवर्तिका

मान्याः पारिषदाः महदिदमानन्दस्थानं संस्कृतप्रियाणां यत् निखिलभारतीयवितन्त्रीकशब्दप्रतिष्ठानस्य 'अल् इण्डिया रेडिओ' इत्यभिधानस्य कलिकातास्थगुल्मस्थानात् अन्तरान्तरा संस्कृतरूपकाणामांशिकाभिनयस्तथा संस्कृतकाव्यादीनामंशविशेषावृत्तिश्च कियतः कालात् प्रभृति प्रवर्त्तत इति। भारतवर्षस्य स्वाधीनतायां लब्धपदायामिदमवश्यमाशास्यं भारतसंस्कृतिप्रणयिनाम्। अयमारम्भः सर्वथा शुभोदर्को भवितेति सम्भाव्यते। अनेन हि प्रबन्धेन संस्कृतभाषाया महानुत्कर्षः सर्वेषां विदितस्तत्र महतीं रतिं जनानामुपजनयेत्। तदत्र विषये या या भारतवर्षे सुप्रतिष्ठा परिषदास्ते, तस्यास्तस्याः सर्वस्या एव परिषदः कालभेदेनावसरप्रदानश्चेत् सुष्ठु व्यवस्था कृता स्यात्। अस्य प्रबन्धस्य यथा यथाक्रमेण विवृद्धिः स्यात्, तथा वयं कामयामहे।

पुस्तकप्राप्तिस्वीकारः

प्रियाः पाठकवर्याः! समुपहृतं नो "गीतासारा"ख्यं किमपि पुस्तकं तत्सम्पादकेन श्रीमता मनोरञ्जनराय एम ए, बि एल महोदयेन। नाम्नैव प्रतीयते पुस्तकेऽस्मिन किं नाम वस्तु सविशेषं पदं करोतीति। गीता हि नाम भगवतोऽमृतवर्षिणी वाणी, तस्याः सारोऽपि यदमृतायेतेत्यत्र किं वास्ति बहु वक्तव्यम्। तन्मन्ये यदीदृशानां पुस्तकानां बहुलः प्रचारो मानवसमाजस्य कल्याणायैवेति।

०२८४३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishat Series

(Revised up to April, 1949)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; Rs. 2 (for members).

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16. **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof. Akshayakumar Shastri. Re. 2-8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M.A. Rs. 7-8 ; Rs. 6 (for members). Almost out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 17, R. G. Kar Road, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri